नं. ४११४

नाम. भगवद्गीता गूढार्थदीपि-
को. टीका

द्वितीयाध्याय:

कर्ता श्री मधुसूदन सरस्वती.

पत्र सं. २२ —— सं. x

विषय: वेदान्तशास्त्र
(महाभारते)

भगवद्गीताटीका गूढार्थदीपिका षष्ठाध्यायः

४९९४

4994

F. = 40

त्रिश्लोकोक्तयोगतत्त्वम्=२ अस्मिन्ध्याये षष्ठे=२

अतो कर्मसाधनाभ्यासनिष्ठं चेह हरिरीरितं ॥ तत्स्वरूपपरिज्ञाते सर्वेषां मुक्तिसाधनं ॥ योगतत्त्वं त्रिभिः श्लोकैः
पंचमांते यदीरितं । षष्ठ आरभ्यते ध्यायस्तस्याख्यानाय विस्तरात् ॥ अत्र सर्वकर्मत्यागेन योगं विधा-
कर्मयोगस्य हीनत्वम्= स्तुं त्याज्यत्वेन हीनत्वमाशंक्य कर्मयोगं द्वाभ्यां स्तुवन् ॥ श्रीभगवानुवाच । कर्मणां फलमनाश्रि-
तोनपेक्षमाणाः फलाभिसंधिरहितः सन् कार्यं कर्तव्यतया शास्त्रेण विहितं नित्यमग्निहोत्रादि ।
कर्म करोति यः स कर्म्यपि सन् संन्यासी योगी चेति स्तूयते ॥ संन्यासो हि त्यागः ॥ चित्तगतविक्षेपा-

श्रीभगवानुवाच ॥

अनाश्रितः कर्मफलं । कार्यं कर्म करोति यः ॥

निष्कामकर्मानुष्ठायिनं संन्यासि... ते=२

भावश्च योगस्तौ चास्य विद्येते फलत्यागात् फलतृष्णारूपचित्तविक्षेपाभावाच्च कर्मफलतृष्णात्या-
गपर्वान्त्र योगापाहत्यात्संन्यासयोगशब्दाभ्यामभिधीयते सकामर्मलब्धप्राशस्त्यकथनाय ॥ अवश्यं यस्मात्
भाविनो हि निष्कामकर्मानुष्ठानतृर्मुख्यो संन्यासयोगौ तस्मादयं यद्यपि न निरग्निः अ ॥ ॥ ॥

निष्कामकर्मानुष्ठायी=२

गी॰टी॰ म॰ ६॰ १

ग्निसाध्यश्रौतकर्मत्यागी न भवति न चाक्रियः अग्निनिरपेक्षस्मार्तक्रियात्यागी च न भवति तथापि ।
सन्न्यासी योगी चेति मन्तव्यः ॥ अयं भावः न निरग्निर्न चाक्रियः सन्न्यासी योगी चेति मन्तव्यः किं तु सा
ग्निः सक्रियश्च निष्कामकर्मानुष्ठायी सन्न्यासी योगी चेति मन्तव्य इति तत्त्वयन्ते ॥ अपरथा वा न्ययोगा
अप्येभ्यः पशवो मोक्षभाक्त्वा इत्येवं पशवः स्थालद्वारायां न जन्तवो पापपतितः ॥ अत्र चाक्रियो ने ने अ
वसर्वकर्मसन्न्यासिनि लक्षणे निरग्निरिति वाच्ये स्यादित्यग्निशब्देन सर्वाणि कर्माण्युपलक्ष्य ।

इत्याशंक्य

तु सन्न्यासी च योगी च ॥ न निरग्निर्न चाक्रियः ॥ १ ॥

कथ्यते

निरग्निशब्देन = निरग्निरिति सन्न्यासी क्रियाशब्देन चित्तवृत्तीरुपलक्ष्य अक्रिय इति निरुद्धचित्तवृत्तिर्योगी ।
च कथ्यते तेन न निरग्निः सन्न्यासी मन्तव्यो न चाक्रियो योगी मन्तव्य इति यथासंख्यमन्वय । यथाक्रमं
व्यतिरेको दर्शनीयः ॥ एवं सति निजहृदयमप्युपपन्नमिति द्रष्टव्यं १ ॥ शुभमस्तु ॥ ॥ ॥

उभयस्य निरग्निः
अक्रियस्य च = २

यो

अक्रियशब्देन = ३

असंन्यासेपिसंन्यासशब्दप्रयोगेनिमित्तभूतंगुणयोगंदर्शयितुमाहयमिति यंसर्वकर्मतत्फलपरित्यागं
संन्यासमितिप्राहुः श्रुतयः न्यासएवात्यरेचयतीतिपुत्रैषणायाश्चवित्तैषणायाश्चलोकैषणायाश्च
व्युत्थायाथभिक्षाचर्यंचरंतीत्याद्याः योगंफलतृष्णाकर्तृत्वाभिमानयोःपरित्यागेनविहितकर्मानु
ष्ठानंतंसंन्यासंविद्धिहेपांडव अब्रह्मदत्तंब्रह्मदत्तमित्याह। नवयंमन्यामहे ब्रह्मदत्तसदृशोयमिति।
न्यायात्पशब्दःपरत्रप्रयुज्यमानःसादृश्यंबोधयतिगौणापत्त्यातद्बोधेपरगुणवाप्रहृतेनतत्किंसादृश्य।
वा

यंसंन्यासमितिप्राहुर्योगंतंविद्धिपांडव ॥

मितितदाह॥ नहीति॥ हियस्मात्॥ असंन्यस्तसंकल्पः अत्यक्तफलसंकल्पःकश्चनकश्चिदपियोगीन
भवति॥ अपितुसर्वोयोगीत्यक्तफलसंकल्पएवभवतीतिफलत्यागसाम्यात् तस्माद्वृत्तिचित्तवृत्ति
निरोधसाम्याच्चयोगापत्त्याकर्म्येवसंन्यासीचयोगीचभवतीत्यर्थः॥ तथाहि॥ योगश्चित्तवृत्तिनि
रोधः॥ प्रमाणविपर्ययविकल्पनिद्रास्मृतयश्चित्तवृत्तयःपंचविधाः॥ त ॥ श्रीरामजीसहा ॥

गी॰टी॰ म प्रत्यक्षानुमानशाब्दोपमानार्थापत्त्यभावाख्यानि प्रमाणानि षडिति वैदिकाः प्रत्यक्षानुमानाग-
म॰ष॰ माः प्रमाणानि त्रीणीति योगाः ॥ अंतर्भाववहिर्भावाभ्यां संकोचो द्रष्टव्यो ॥ अत एव तार्किकादी-
२ पं नां मतभेदाः ॥ विपर्ययो मिथ्याज्ञानं ॥ तस्य पंच भेदाः ॥ अविद्यास्मितारागद्वेषाभिनिवेशाः ॥ त
एव च क्लेशाः ॥ शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः प्रमाभ्रमविलक्षणोऽसदर्थव्यवहा-
रः शशविषाणमसंतुरुषस्य चैतन्यमित्यादिः ॥ अभावप्रत्ययालंबना वृत्तिर्निद्रा च तस्त्वणां

2

न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चन २॥

वृत्तीनामभावस्य प्रत्ययः कारणं तमोगुणस्तदालंबना वृत्तिरेव निद्रा ॥ न तु ज्ञानाद्यभावमात्र-
मित्यर्थः ॥ अनुभूतविषयासंप्रमोषः स्मृतिः पूर्वानुभवसंस्कारजं ज्ञानमित्यर्थः सर्ववृत्तित्याज्यत्वा-
देते कथ्यंते ॥ लज्जादिवृत्तीनामपि पंचस्वेवांतर्भावो द्रष्टव्यः ॥ एतादृशां सर्वासां चित्तवृत्तीनां निरो-
धो योग इति च समाधिरिति च कथ्यते ॥ फलसंकल्पस्तु रागाख्यः तृतीयो विपर्ययभेदस्तन्नि-
रोधमात्रमपि गौण्या वृत्त्या योग इति संन्यास इति चोच्यत इति न विरोधः ॥ २॥ ॐ नमः शिवाय

तर्हि किं प्रशस्तत्वात्कर्मयोग एव यावज्जीवमनुष्ठेय इति नेत्याह आरुरुक्षोरिति योगमंतःकरणशुद्धिरू
पं वैराग्यमारुरुक्षोः आरोढुमिच्छोः ॥ मत्वारूढस्य मुनेर्भविष्यतः कर्मफलस्य तत्साम्यागिनः कर्मशा
स्त्रविहितमग्निहोत्रादिनित्यं भगवदर्पणबुद्ध्या कृतं कारणं योगारोहणसाधनमनुष्ठेयमुच्यते वेदम
रेव नमया ॥ योगारूढस्य योगमंतःकरणशुद्धिरूपं वैराग्यं प्राप्तवतस्तस्यैव पूर्वं कर्मिणोपि सतः श
मः सर्वकर्मसंन्यासएव कारणमनुष्ठेयमनया ज्ञानपरिपाकसाधनमुच्यते ३ कदा योगारूढो भवती
त्युच्यते यदेति ॥ यदा यस्मिंश्चित्तसमाधानकाले इंद्रियार्थेषु शब्दादिषु कर्मसु च नित्यनैमित्तिककाम्य
लौकिकप्रतिषिद्धेषु नानुषज्जते तेषां मिथ्यात्वदर्शनेनात्मनोऽकर्तृभोक्तृपरमानंदाद्वयस्वरूपद

आरुरुक्षोर्मुनेर्योगं। कर्मकारणमुच्यते॥ योगारूढस्य तस्यैव शमः कारणमुच्यते ३ यदा
हि नेंद्रियार्थेषु। न कर्मस्वनुषज्जते। सर्वसंकल्पसंन्यासी। योगारूढस्तदोच्यते॥४॥ राम

र्शनेन च प्रयोजनाभावबुद्ध्या अहमेतेषां कर्ता ममैते भोग्या इत्यभिनिवेशरूपमनुषंगं न करोति।
हि यस्मात्तस्मात् सर्वसंकल्पसंन्यासी॥ सर्वेषां संकल्पानामिदं मया कर्तव्यमेतत्फलं भोक्तव्यमि
त्येवंरूपाणां मनोवृत्तिविशेषाणां तद्विषयाणां च कामानां तत्साधनानां च कर्मणां त्यागशीलः॥
तदा शब्दादिषु कर्मसु चावासंगस्य तद्धेतोः संकल्पस्य योगारोहणप्रतिबंधकस्याभावात् योगं समा

गी॰टी॰ यो यदेवं योगारूढो भवति तदा तेनात्मनैवात्मोद्धृतो भवति संसारादनर्थव्रातादित्याह उद्धरेदिति। आ
म॰ष॰ त्मना विवेकयुक्तेन मनसा आत्मानं स्वं जीवं संसारसमुद्रे निमग्नं तत उद्धरेत्॥ विषयासंगपरि
३ त्यागेन योगारूढतामापादयेदित्यर्थः॥ न तु विषयासंगेनात्मानमवसादयेत् संसारसमुद्रे म
॥ ज्जयेत् हि यस्मात्॥ आत्मैवात्मनो बंधुः हितकारी संसारबंधान्मोचनहेतुर्नान्यः कश्चिल्लौकि
कस्य बंधोरपि स्नेहानुबंधहेतुत्वात्॥ आत्मैव नान्यः कश्चिदात्मनो रिपुः शत्रुः अहित
कारी विषयबंधनादिप्रवेशनात् कोशकार इवात्मनः स्वस्य बाह्यस्यापि रिपोरात्मप्रयुक्तत्वा

उद्धरेदात्मनात्मानं। नात्मानमवसादयेत्॥ आत्मैव ह्यात्मनो बंधु। रात्मैव रिपुरात्मनः ५ बं
3 धुरात्मात्मनस्तस्य। येनात्मैवात्मना जितः। अनात्मनस्तु शत्रुत्वे। वर्तेतात्मैव शत्रुवत्।६।

त्प्रयुक्तमवधारणमात्मैव रिपुरात्मन इति।५। इदानीं किंलक्षण आत्मात्मनो बंधुः किंलक्षणो
वात्मनो रिपुरित्युच्यते॥ आत्मा कार्यकारणसंघातो येन जितः स्ववशीकृतः आत्मनैव विवेकयु
क्तेन मनसैव न तु शस्त्रादिना तस्यात्मा स्वरूपमात्मनो बंधुरुक्तः खलु हितत्वभावेन स्वहितक
रणात्॥ अनात्मनस्तु अजितात्मन इत्यर्थेन शत्रुत्वे शत्रुभाव एव वर्तेतात्मैव शत्रुवत् बाह्य
शत्रुरिवोक्तः खलप्रवृत्त्या स्वस्य स्वेनानिष्टाचरणात्॥ ६॥ ॥श्रीराम॥ ॥ ॥ ॥ ॥

३

मे

जितात्मनः स्ववशं युक्तं विहरणोति। शीतोष्णसुखदुःखेषु चित्तविक्षेपकरेषु सत्स्वपि तथा मानापमान
योः पूजापरिभवयोः चित्तविक्षेपहेत्वोः सतोरपि तेषु समत्वेनैव जितात्मनः आरुरुक्षस्य जितेंद्रि
यस्य प्रशांतस्य सर्वत्र समबुद्ध्या रागद्वेषशून्यस्य परमात्मा स्वप्रकाशज्ञानस्वभावः आत्मा समा
हितः समाधिविषयो योगारूढो भवति। परमात्मेत्यत्र। परमितिवा छेदः॥ जितात्मनः प्रशांतस्यै
व परं केवलमात्मा समाहितो भवति नान्यस्य। तस्माज्जितात्मा प्रशांतश्च भवेदित्यर्थः ७ किंच॥
ज्ञानं शास्त्रोक्तानां पदार्थानामौपदेशिकं ज्ञानं विज्ञानं तदप्रामाण्यशंकानिराकरणफलेनावि

जितात्मनः प्रशांतस्य परमात्मा समाहितः। शीतोष्णसुखदुःखेषु तथा मानापमानयोः
ज्ञानविज्ञानतृप्तात्मा। कूटस्थो विजितेंद्रियः। युक्त इत्युच्यते योगी। समलोष्टाश्मकांच
नः॥८॥

चारेण तेषां तथैव स्वानुभवेनापरोक्षीकरणं ताभ्यां तृप्तः संजातालंप्रत्यय आत्मा चित्तं यस्य स त
था। कूटस्थो विषयसन्निधावपि विकारशून्यः। अत एव विजितानि रागद्वेषविषयपूर्वकाद्वि
षयग्रहणाद्व्यावर्तितानींद्रियाणि येन सः। अत एव हेयोपादेयबुद्धिशून्यत्वेन समानि मृत्पिंड।
पाषाणकांचनानि यस्य सः योगी परमहंसः परिव्राजकः। परमवैराग्ययुक्तो योगारूढ इत्युच्यते ८

मन

गी॰ टी॰
अ॰ ६॰
४

5

सुहृन्मित्रादिषु समबुद्धिस्तु सर्वयोगिश्रेष्ठ इत्याह । सुहृत्प्रत्युपकारमनपेक्ष्य पूर्वं स्नेहं संबंधं च विनैवो
पकर्ता ॥ मित्रं स्नेहेनोपकारकः । अरिः स्वकृतापकारमनपेक्ष्य स्वभावक्रौर्येणापकर्ता । उदासी
नो विवदमानयोरुभयोरप्युपेक्षकः मध्यस्थो विवदमानयोरुभयोरपि हितैषी द्वेष्यः स्वकृ
तापकारमपेक्ष्यापकर्ता बंधुः संबंधेनोपकर्ता एतेषु साधुषु शास्त्रविहितकारिषु पापेषु शा
स्त्रप्रतिषिद्धकारिष्वपि च कारादन्येषु च सर्वेषु समबुद्धिः कः कीदृक् कर्मेति अव्यापृतबुद्धिः
सर्वत्र रागद्वेषशून्यः ॥ विशिष्यते सर्वत उत्कृष्टो भवति ॥ विमुच्यत इति वा पाठः । ९ ॥ एवं यो
गारूढस्य लक्षणं फलं चोक्त्वा तस्य सांगं योगं विधत्ते योगीत्यादिभिः स योगी परमो मत इत्यंते

सुहृन्मित्रार्युदासीन । मध्यस्थद्वेष्यबंधुषु । साधुष्वपि च पापेषु । समबुद्धिर्विशिष्यते । ९ ।
योगी युंजीत सततमात्मानं रहसि स्थितः ॥ एकाकी यतचित्तात्मा ॥ निराशीरपरिग्रहः । १० ।

त्रयोविंशत्या श्लोकैः तत्रैवमुत्तमफलप्राप्तये ॥ योगी योगारूढः आत्मानं चित्तं सततं निरंतरं युं
जीत क्षिप्तमूढविक्षिप्तभूमिपरित्यागेनैकाग्रनिरोधभूमिभ्यां समाहितं कुर्यात् । रहसि स्थि
ते गुहादौ योगप्रतिबंधकदुर्जनादिवर्जिते देशे स्थितः । एकाकी त्यक्तसर्वपरिजनः संन्या
सी ॥ चित्तमंतःकरणमात्मा देहश्च संयतौ योगप्रतिबंधकव्यापारशून्यौ यस्य स यतचित्ता
त्मा यतो निराशीर्वैराग्यदार्ढ्येन विगततृष्णः अत एव चापरिग्रहः शास्त्राभ्यनुज्ञातेना
पि योगप्रतिबंधकेन परिग्रहेण शून्यः ॥ १० ॥

तत्रासननियमं दर्शयन्नाह द्वाभ्यां शुचौ देश इति शुचौ स्वभावतः संस्कारतो वा शुद्धे जनसमुदायरहिते प
निर्भये गंगातटगुहादौ देशे स्थाने प्रतिष्ठाप्य स्थिरं निश्चलं नात्युच्छ्रितं नात्युच्छ्रितं नातिनीचं चै-
व लाजिनकुशोत्तरं ॥ चैलं मृदु वस्त्रं ॥ अजिनं मृदु व्याघ्रादिचर्म ते कुशेभ्य उत्तरे उपरितने यस्मिंस्तत्
आस्तृतेष्वित्यासने कुशाग्रेषूपविश्य तदुपरि मृदु चर्म तदुपरि मृदु वस्त्रमित्यर्थः। तथा चाह भगवा-
न्पतंजलिः ॥ स्थिरसुखमासनमिति आत्मन इति परासनव्यावृत्त्यर्थं तस्यापि परेक्षानियमाभा-
वेन योगविक्षेपकरत्वात् ॥११॥ एवमासने प्रतिष्ठाप्य किं कुर्यादिति तत्राह तत्रैकाग्रमिति ॥ तत्र त-
स्मिन्नासने उपविश्यैव न तु शयानस्तिष्ठन्वा। आसीनः संभवादिति न्यायात् ॥ यताः संयता उपरताश्चि-

शुचौ देशे प्रतिष्ठाप्य। स्थिरमासनमात्मनः॥ नात्युच्छ्रितं नातिनीचं चैला-
जिनकुशोत्तरं ॥ तत्रैकाग्रं मनः कृत्वा ॥ यतचित्तेन्द्रियक्रियः ॥॥॥ रामजी

त्तेन्द्रियाणां च क्रिया यस्य स यतचित्तेन्द्रियक्रियः सन् योगं समाधिं युंजीताभ्यसेत्। किम-
र्थम् आत्मविशुद्धये ॥ आत्मनोऽन्तःकरणस्य सर्वविक्षेपशून्यत्वेनातिसूक्ष्मतया ब्रह्मसाक्षात्कारयोग्य-
या तायै दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति श्रुतेः ॥ किं कृत्वा योगमभ्यसेदिति तत्राह। एका-
ग्रं राजसतामसव्युत्थानाख्यभूमित्रयपरित्यागेनैकविषयकधारावाहिकानेकवृत्तियु-
क्तमुद्रिक्तसत्त्वं मनः कृत्वा दृढभूमिकेन प्रयत्नेन संपाद्य एकाग्रताविवृद्ध्यर्थं योगं संप्रज्ञातसमाधिं

गी॰टी॰ अ॰६ ५ मनोवृत्तिप्रवाहएवनिर्दिध्यासनाख्यः। तदुक्तं॥ ब्रह्माकारमनोवृत्तिप्रवाहोहंकृतिंविना। संप्रज्ञा
तसमाधिःस्याद्ध्यानाभ्यासप्रकर्षतइति॥ एतदेवाभिप्रेत्यध्यानाभ्यासप्रकर्षंविदधेश्रीभग
वान्॥ योगीयुंजीतसततं॥ युंज्याद्योगमात्मविशुद्धये॥ युक्तआसीतमत्परइत्यादिवक्ष्यमाणः
१२॥ तदर्थंबाह्यमासनमुक्त्वाऽधुनातत्रकथंशरीरधारणमित्यपेक्षायामाह समंकायेति। कायश
रीरंमध्यंचशिरश्चग्रीवाचकायशिरोग्रीवंमूलाधारादारभ्यमूर्धांतपर्यंतंसममवक्रं।

उपविश्यासनेयुंज्याद्योगमात्मविशुद्धये १२॥ समंकायशिरोग्रीवं
धारयन्नचलंस्थिरः। संप्रेक्ष्यनासिकाग्रंस्वं। दिशश्चानवलोकयन् १३

अचलमकंपंधारयन्एकतत्वाभ्यासेनविक्षेपलयाभावंगमिज्ञघस्वाभावेसंपादयन्स्थि
रःदृढप्रयत्नोभूत्वा॥ किंचस्वीयंनासिकाग्रंसंप्रेक्ष्यवलयविक्षेपपरिहृत्यायोविषयप्र
वृत्तिरहितोनिमीलितनेत्रइत्यर्थः। दिशश्चानवलोकयन्अंतरांतरादिशांचावलोकन
मकुर्वन्॥ योगप्रतिबंधकत्वात्स्वर्गवंभूतःसन्नासीतेत्युत्तरेणसंबंधः॥ १३ श्रीरामजी ५

कारण

किंच॥ निदाननिवृत्तिद्वारेणाकर्षणायंतोवागादिदोषरहित आत्मांतःकरणं यस्य स प्रशांतात्मा
स्त्रीयनिग्रहयद्वार्यीत विगताभीः सर्वकर्मपरित्यागे युक्तत्वायुक्तत्वशंकायस्य स विगतभीः ब्रह्मचा
रिव्रते ब्रह्मचर्यगुरुशुश्रूषाभिक्षाभोजनादौ स्थितः। मनः संयम्य विषयाकारवृत्तिशून्यं कृत्वा
मयि परमेश्वरे प्रत्यक्चिति सगुणे निर्गुणे वा चित्तं यस्य स मच्चित्तोऽसन् द्विषयकधारावाहिकचित्तवृ
त्तिमान्॥ पुत्रादौ प्रिये चिंतनीये सति कथमेवं स्यादत आह॥ मत्परः॥ अहमेव परमानंदरूपत्वा
त्परः पुरुषार्थः प्रियो यस्य स तथा॥ तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादंतरतरं

प्रशांतात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः। मनः संयम्य मच्चित्तो युक्त आसीत मत्परः॥ १४॥

यदयमात्मेति श्रुतेः॥ एवं विषयाकारसर्ववृत्तिनिरोधेन भगवदेकाकारचित्तवृत्तियुक्तः। संप्रज्ञा
तसमाधिमानासीतोपविशेत् यथाशक्ति न तु स्वेच्छया व्युत्तिष्ठेदित्यर्थः॥ भवति कश्चिद्रागी स्त्री।
चित्तो न तु स्त्रियमेव परत्वेनाराध्यत्वेन गृह्णाति किं तर्हि राजानं वा देवं वा अयं तु मच्चित्तो मत्परश्च सर्वा
राध्यत्वेन मामेव मन्यत इति भाष्यकृतो व्याख्या॥ व्याख्यानं त्विदं मे नातीव भाष्यकारेण कल्पिता। गुंजायाः किं

ते संप्रज्ञातसमाधिपादिताः फलविशेषाः समाधेः प्रकर्षंगन्तुः पुरुषस्य उपसर्गा उपद्रवा विघ्नकारिणः तत्र
हर्षविस्मयादिकरणेन समाधिः शिथिलो भवति व्युत्थाने तु व्यवहारदशायां विशिष्टफलदायकत्वात्सिद्धयो भवन्ति = ८

गी॰टी॰ म॰ष ६

एवं संप्रज्ञातसमाधिनासीनस्य किं स्यादित्युच्यते ॥ एवं दृढावस्थानादिपूर्वोक्तनियमेनात्मानं मनो
युञ्जन्नभ्यासवैराग्याभ्यां समाहितं कुर्वन् योगी सदा योगाभ्यासपरोऽभ्यासातिशयेन नि
यतेति निरुद्धमानसं मनो येन नियता निरुद्धा मानसा वृत्तिरूपा विकारा येनेति वा नियतमान
सः सन् शांतिं सर्ववृत्त्युपरतिं प्राप्तवान् हि तं निर्वाणपरमां तत्त्वसाक्षात्कारेण त्यक्तद्वे
णासकार्या विद्या निवृत्तिरूपां मत्संस्थां पर्यवसायिनीं मत्संस्थां मत्स्वरूपपर्यवसानं द्रूपां निष्ठा
मधिगच्छति नतु सांसारिकाण्यैश्वर्याणि आत्मविषयसमाधिफलान्यधिगच्छति । तेषामप
वर्गोपयोगिसमाध्युपसर्गत्वात् तथा च ॥ ते तत्समाधिफलान्युक्त्वाह ॥ भगवान् पतंजलिः । ते
समाधावुपसर्गा व्युत्थाने सिद्धय इति ॥ स्थान्युपनिमंत्रणे संगस्मयाकरणं पुनरनिष्टप्र
संगादिति च । स्थानिनो देवाः ॥ तथा चोद्दालकोऽदेवैः नं त्रिलोकपितत्रसंगमादरं स्मयं गर्वं चा
कृत्वा देवानवज्ञाय पुनरनिष्टप्रसंगनिवारणाय निर्विकल्पकमेव समाधिमकरोदिति व
शिष्टेनोपाख्यायते मनुमनुस्मृर्भिर्हे यश्च समाधिः स त्रिवितः पतंजलिना । वितर्कविचारानंदास्मि
तानुगमात्संप्रज्ञातः सम्यक्संशयविपर्ययानध्यवसायरहितत्वेन प्रज्ञायते प्रकर्षेण विशेषरू
पेण ज्ञायते भाव्यस्य रूपं येन स संप्रज्ञातः समाधिर्भावनाविशेषः भावना हि भाव्यस्य विषयांत
रपरिहारेण चेतसि पुनः पुनर्निवेशनं ॥ भाव्यं च विविधं ॥ ग्राह्यग्रहणग्रहीतृभेदात् ग्राह्यम
पि द्विविधं स्थूलसूक्ष्मभेदात् । तदुक्तं । क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत् ।

© Dharmartha Trust J&K. Digitized by eGangotri

येषु । तत्स्थता । तत्रैवैकाग्रता ॥ तदंजनता तन्मयता न्यग्भूते चित्ते भाव्यमानस्यैवोत्कर्ष इति यावत् । तथा
विधा समापत्तिस्तद्रूपः परिणामो भवति ॥ यथाभिजातस्य निर्मलस्य स्फटिकमणेस्तत्तदुपाश्रयव
शात्तत्तद्रूपापत्तिः ॥ एवं निर्मलस्य चित्तस्य तत्तद्भावनीयवस्तूपरागात्तद्रूपापत्तिः समापत्तिः समाधि
रिति च पर्यायः ॥ यद्यपि ग्रहीतृग्रहणग्राह्येष्वित्युक्तं ॥ तथापि भूमिकाक्रमवशात् ग्राह्यग्रहणग्र
हीतृष्विति बोद्धव्यं ॥ यतः प्रथमं ग्राह्यनिष्ठ एव समाधिर्भवति ततो ग्रहणनिष्ठः । ततो ग्रहीतृनिष्ठ
इति ग्रहीत्रादिक्रमोप्यग्रे व्याख्यास्यते ॥ तत्र यदा स्थूलं महाभूतेंद्रियात्मकं षोडशविकाररूपं वि
षयमादाय पूर्वापरानुसंधानेन शब्दार्थोल्लेखेन च भावना क्रियते तदा सवितर्कः समाधिः ॥ अ
स्मिन्नेवालंबने पूर्वापरानुसंधानशब्दार्थोल्लेखशून्यत्वेन यदा भावना प्रवर्त्तते तदा निर्वितर्कः समा
धिः एतावुभावपि वितर्कशब्देनोक्तौ ॥ तन्मात्रांतः ॥ करणलक्षणं सूक्ष्मं विषयमालंब्य तस्य
देशकालधर्मावच्छेदेन यदा भावना प्रवर्त्तते तदा सविचारः अस्मिन्नेवालंबने देशकालधर्मा
वच्छेदं विना धर्मिमात्रावभासित्वेन यदा भावना प्रवर्त्तते तदा निर्विचारः एतावुभावपि विचार
शब्देनोक्तौ तथा च भाष्यं वितर्कश्चित्तस्य स्थूल आलंबने आभोगः सूक्ष्मो विचार इति इयं ग्राह्य
समापत्तिरिति व्यपदिश्यते यदा रजस्तमोलेशानुविद्धमंतःकरणसत्त्वं भाव्यते तदा गुणभावा
च्चितिशक्तेः सुखप्रकाशमयस्य सत्त्वस्य भाव्यमानस्योद्रेकात् सानंदः समाधिर्भवति अस्मिन्नेव स

गी॰ टी॰
मं॰ ५
७

पंगमप्रकंपंतिविगतदेहाहंकारत्वाद्विदेहशब्देनोच्यते । इयं ग्रहणसमापत्तिः ततः परं रजस्तमोले-
शानभिभूतं शुद्धसत्त्वमालंबनीकृत्य या भावना प्रवर्तते तस्यां ग्राह्यस्य सत्त्वस्य न्यग्भावाच्चिति-
शक्तेरुद्रेकात्सत्तामात्रावशेषत्वेन समाधिः सास्मित इत्युच्यते । न चाहंकारास्मितयोरभेदः शं-
कनीयः ॥ यतो यत्रांतःकरणमहमित्युल्लेखेन विषयान्वेदयते सोहंकारः ॥ यत्र त्वंतर्मुखत-
या प्रतिलोमपरिणामेन प्रकृतिलीने चेतसि सत्तामात्रमवभाति सास्मिता ॥ अस्मिन्नेव
समाधौ ये कृतपरितोषास्ते परं पुरुषमपश्यंतश्चेतसः प्रकृतौ लीनत्वात्प्रकृतिलया इत्यु-
च्यंते ॥ सेयं ग्रहीतृसमापत्तिरस्मितामात्ररूपग्रहीतृनिष्ठत्वात् ॥ येन परं पुरुषं विविच्य भा-
वनायां प्रवर्तंते तेषामपि केवलपुरुषविषया विवेकख्यातिर्ग्रहीतृसमापत्तिरपि न सास्मि-
तः समाधिः विवेकेनास्मितायास्त्यागात् । तत्र ग्रहीतृभावनपूर्वकमेव ग्रहणभावनं ॥ तत्पूर्व-
कं च सूक्ष्मग्राह्यभावनं । तत्पूर्वकं च स्थूलग्राह्यभावनमिति ॥ स्थूलविषयो द्विविधोपि वित-
र्कश्चतुष्टयानुगतः ॥ द्वितीयो वितर्कविकलस्त्रितयानुगतः । तृतीयो वितर्कविचाराभ्यां विक-
लो द्वितयानुगतः । चतुर्थो वितर्कविचारानंदैर्विकलोस्मितामात्र इति चतुरवस्थोयं संप्रज्ञा-
त इति ॥ एवं सवितर्कः सविचारः सानंदः सास्मितश्च समाधिरंतर्णीतादिसिद्धिहेतुत्वादयमभि-
हितसमाधिविरोधित्वाद्धेय एव मुमुक्षुभिः ॥ ग्रहीतृग्रहणयोरपि चित्तधर्मविषयत्वदशायां
ग्राह्यकोटौ निक्षेपाद्धेयोपादेयविभागकथनाय ग्राह्यसमापत्तिरेव विहिता सूत्रकारेणा चतु-
र्विधा हि ग्राह्यसमापत्तिः स्थूलग्राह्यगोचरा द्विविधा सवितर्का निर्वितर्का च सूक्ष्मग्राह्यगोच ७

विचारा निर्विचारा च ॥ तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का ॥ शब्दार्थज्ञानविकल्पसंभिन्ना स्थू-
लार्थावभासरूपा सवितर्का समापत्तिः स्थूलगोचरा सविकल्पकवृत्तिरित्यर्थः ॥ स्मृतिपरिशुद्धौ
स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का ॥ तस्मिन्नेव स्थूलआलंबने शब्दार्थस्मृतिप्रविलये
प्रत्युदितस्पष्टग्राह्याकारप्रतिभासितया न्यग्भूतज्ञानांशत्वेन स्वरूपशून्येव निर्वितर्का समाप-
त्तिः स्थूलगोचरा निर्विकल्पकवृत्तिरित्यर्थः । एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्या-
ता ॥ सूक्ष्मस्तन्मात्रादिर्विषयो यस्याः सा सूक्ष्मविषया समापत्तिर्द्विविधा सविचारा निर्विचारा च ।
सविकल्पकनिर्विकल्पकभेदेन ॥ एतयैव सवितर्कया निर्वितर्कया च स्थूलविषयया समापा-
त्त्या व्याख्याता । शब्दार्थज्ञानविकल्पसहितत्वेन देशकालधर्माद्यवच्छिन्नः सूक्ष्मोऽर्थः प्रतिभा-
ति यस्यां सा सविचारा ॥ शब्दार्थज्ञानविकल्परहितत्वेन देशकालधर्माद्यनवच्छिन्नत्वेन च धर्मि-
मात्रतया सूक्ष्मोऽर्थः प्रतिभाति यस्यां सा निर्विचारा ॥ सविचारनिर्विचारयोः सूक्ष्मविषयत्वविशेष-
णात् सवितर्कनिर्वितर्कयोः स्थूलविषयत्वमर्थाद्व्याख्यातं ॥ सूक्ष्मविषयत्वं चालिंगपर्यव-
सानम् । सविचारायां निर्विचारायाश्च समापत्तेर्यत्सूक्ष्मविषयत्वमुक्तं तदलिंगपर्यन्तं द्रष्टव्यं । ते-
नानंदसास्मितयोर्ग्रहीतृग्रहणसमापत्त्योरपि ग्राह्यसमापत्तावेवांतर्भाव इत्यर्थः ॥ तथा हि ॥
पार्थिवस्याणोर्गन्धतन्मात्रं सूक्ष्मो विषयः । आप्यस्यापि रसतन्मात्रं तैजसस्य रूपतन्मात्रं वायवीय-
स्य स्पर्शतन्मात्रं नभसः शब्दतन्मात्रम् । तेषामहंकारः तस्यापि लिंगमात्रं महत्तत्त्वं तस्याप्यलिंगं प्रधानं

शब्दादिशब्देन ... अन्तःकरणं

न क्वचिल्लीयते न वा किंचिल्लिङ्गं गमयतीति अलिङ्गं प्रधानं तत्पर्यन्तं सूक्ष्मविषयत्वं तथा हि गुणानां परिणामे चत्वारि पर्वाणि विशिष्टलिङ्गं अविशिष्टलिङ्गं लिङ्गमात्रम् अलिङ्गं चेति विशिष्टलिङ्गं भूतानि अविशिष्टलिङ्गं तन्मात्रेन्द्रियाणि लिङ्गमात्रं बुद्धिः

गी॰टी॰ णानां प्रधान एव सूक्ष्मताविश्रान्तेस्तस्यापि तन्मेव सूक्ष्मविषयत्वमुक्तं ॥ यद्यपि प्रधानादपि पुरुषः सू
यि म॰ष॰ क्ष्मस्तथाप्यन्वयिकारणत्वाभावात्तस्य सर्वान्वयिकारणं प्रधानमेव निरतिशयं सूक्ष्ममित्याख्या
८ तं ॥ पुरुषस्तु निमित्तकारणं सदपि नान्वयिकारणत्वेन सूक्ष्मतामर्हतीत्यन्वयिकारणत्वाविवक्ष
यां पुरुषोऽपि सूक्ष्मो भवत्येवेति द्रष्टव्यं ॥ ता एव सबीजः समाधिः ॥ ताश्चतस्रः समापत्तयो
ग्राह्येण बीजेन सह वर्तन्त इति सबीजः समाधिः वितर्कविचारानन्दास्मितानुगमात्संप्रज्ञात इ
ति प्रागुक्ताः ॥ स्थूलेऽर्थे सवितर्को निर्वितर्कः ॥ सूक्ष्मेऽर्थे सविचारो निर्विचार इति ॥ तत्रोत्तिम
स्य फलमुच्यते ॥ निर्विचारवैशारद्येऽध्यात्मप्रसादः स्थूलविषयत्वे तुल्येऽपि सवितर्कः शब्दा
र्थज्ञानविकल्पसंकीर्णमपेक्ष्य तद्रहितस्य निर्विकल्पकरूपस्य निर्वितर्कस्य प्राधान्यं ॥ ततः
सूक्ष्मविषयस्य सविकल्पकप्रतिभासरूपस्य सविचारस्य ततोऽपि सूक्ष्मविषयस्य निर्विक
ल्पकप्रतिभासरूपस्य निर्विचारस्य प्राधान्यं ॥ तत्र पूर्वेषां त्रयाणां निर्विचारार्थत्वान्निर्विचा
रफलेनैव फलवत्त्वं ॥ निर्विचारस्य तु प्रकृष्टाभ्यासबलाद्वैशारद्ये रजस्तमोऽनभिभूतसत्त्वो
द्रेके सत्यध्यात्मप्रसादः क्लेशवासनारहितस्य चित्तस्य भूतार्थविषयः क्रमाननुरोधी स्फुटः प्रज्ञालोकः
प्रादुर्भवति ॥ तथा च भाष्यं ॥ प्रज्ञाप्रासादमारुह्य अशोच्यः शोचतो जनान् ॥ भूमिष्ठानिव
शैलस्थः सर्वान्प्राज्ञोऽनुपश्यतीति ॥ ऋतंभरा तत्र प्रज्ञा तस्मिन्प्रज्ञाप्रसादे सति स
माहितचित्तस्य योगिनो या प्रज्ञा जायते सा ऋतंभरेत्युच्यते ॥ ऋतं ॥ ॥ ॥ ॥

अस्याः प्रज्ञायाः ऋतंभरा ... श्रुतमागमज्ञानं अनुमानं युक्तं ... नाम्ना या जायते प्रज्ञा ... नहि शब्दलिंगयो ... विशेषविषयता ... निर्विचारवैशारद्यसमुपेता प्रज्ञा नाम्ना विलक्षणा विशेष ... विषयत्वात्

ऋतंभरा = सत्यमेव बिभर्त्ति न तत्र विपर्यासगंधोप्यस्तीति योगिकेवेयं समाख्या सा चोत्तमो योगः ॥ तथा च भाष्यं आ
ऋतंभरायां गमेनानुमानेन ध्यानाभ्यासरसेन च ॥ त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तममिति ॥ सा तु श्रुतानु
मानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात् ॥ श्रुतमागमविज्ञानं तत्सामान्यविषयमेव ॥ नहि विशे
षेण सह कस्यचित् शब्दस्य संगतिर्ग्रहीतुं शक्यते ॥ तथानुमानं सामान्यविषयमेव नहि विशेषेण
सह कस्यचिद्व्याप्तिर्ग्रहीतुं शक्यते तस्मात् श्रुतानुमानविषयो न विशेषः कश्चिदस्ति न चास्य सूक्ष्म
व्यवहितविप्रकृष्टस्य वस्तुनो लौकिकप्रत्यक्षेणाग्रहणमस्ति ॥ किंतु समाधिप्रज्ञानिर्ग्राह्य एव स
विशेषो भवति भूतसूक्ष्मगतो वा पुरुषगतो वा ॥ तस्मान्निर्विचारवैशारद्यसमुद्भवायां श्रुतानुमा
नविलक्षणायां सूक्ष्मव्यवहितविप्रकृष्टसर्वविशेषविषयायामृतंभरायामेव प्रज्ञायां योगि
ना महान्प्रयत्न आस्थेय इत्यर्थः ॥ ननु [illegible] व्युत्थानसंस्काराणामेकाग्रताया
मपि सवितर्कनिर्वितर्कसविचारज्ञानानां संस्काराणां च सद्भावात्तैराप्लाव्यमानस्य चित्तस्य कथं नि
र्विचारवैशारद्यकाध्यात्मप्रसादलभ्यापि ऋतंभरा प्रज्ञा प्रतिष्ठिता स्यादत आह ॥ तज्जः सं
स्कारोन्यसंस्कारप्रतिबंधी ॥ तया ऋतंभरया प्रज्ञया जनितो यः संस्कारः स तत्त्वविषयया प्रज्ञ
या जनितत्वेन बलवत्त्वादन्यान्व्युत्थानजान्समाधिजांश्च संस्कारान् तत्त्वविषयप्रज्ञाजनितत्वे
न दुर्बलान्प्रतिबध्नाति स्वकार्याक्षमान्करोति नाशयतीति वा ॥ तेषां संस्काराणामभिभवात्तदु
द्भवाः प्रत्यया न भवंति ॥ ततः समाधिरुपतिष्ठते ॥ ततः समाधिजा प्रज्ञा ॥ ततः प्रज्ञाकृताः संस्कारा

पा॰टी॰ ज्ञाततज्जसंस्कारा इति॥ ननु भवतु व्युत्थानसंस्काराणामनत्वविषयप्रज्ञाजनितानां तत्त्वमात्रविषयसं
अ॰१ प्रज्ञातसमाधिप्रज्ञाप्रभवैः संस्कारैः प्रतिबंधस्तेषां तु संस्काराणां प्रतिबंधकाभावादेकाग्रभूमाव
९ वसवीजः समाधिः स्यात् ननु निर्वीजो निरोधभूमाविति तत्राह॥ तस्यापि निरोधे सर्वनिरोधान्नि
र्वीजः समाधिः॥ तस्य संप्रज्ञातस्य समाधेरेकाग्रभूमिजस्य॥ अपिशब्दाद्विक्षिप्तज्ञाना
नपि निरोधे योगिप्रयत्नविशेषेण विलये सति सर्वनिरोधात्समाधेः समाधिजस्य संस्कारस्या
पि निरोधान्निर्वीजो निरालंबनोऽसंप्रज्ञातसमाधिर्भवति स च कोपायः अत आह सूत्रितः॥ विराम
प्रत्ययाभ्यासपूर्वकः संस्कारशेषोऽन्य इति॥ विरम्यतेऽनेनेति विरामो वितर्कविचारानंदास्मि
तादिरूपचिंतात्यागः तस्य प्रत्ययः कारणं परं वैराग्यमिति यावत्॥ विरामश्चासौ प्रत्ययश्चेति त
त्रिविशेषण इति वा॥ तस्याभ्यासः पौनःपुन्येन चेतसि निवेशनं तदेव पूर्वं कारणं यस्य स तथा सं
स्कारमात्रशेषः॥ सर्वथा निर्वृत्तिकोऽन्यः पूर्वोक्तात्सवीजाद्विलक्षणो निर्वीजोऽसंप्रज्ञातसमाधि
रित्यर्थः संप्रज्ञातस्य हि समाधेर्द्वावुपायावुक्तौ॥ अभ्यासो वैराग्यं च॥ तत्र सालंबनत्वादभ्यासस्य
न निरालंबनसमाधिहेतुत्वं घटत इति निरालंबने परं वैराग्यमेव हेतुत्वेनोच्यते॥ अभ्यासस्तु
संप्रज्ञातसमाधिद्वारा प्रणाड्या उपयुज्यते॥ तदुक्तं॥ त्रयमंतरंगं पूर्वेभ्यः धारणाध्यानसमाधि
रूपं साधनत्रयं यमनियमासनप्राणायामप्रत्याहाररूपसाधनपंचकापेक्षया सवीजस्य समा
२ धेरंतरंगं साधनं [illegible]वसमाधिशब्देनाभ्यास एवोच्यते न तु स्वरूपस्य समाधेः साध्यत्वात्
तदपि बहिरंगं निर्वीजस्य॥ निर्वीजस्य तु समाधेस्तदपि त्रयं बहिरंगं परवैराग्योपकारित्वस्य तु ९

मपि द्विविधो भवप्रत्यय उपायप्रत्ययश्च भवप्रत्ययो विदेहप्रकृतिलयानां विदेहानां सानंदानां प्र
कृतिलयानां च सास्मितानां देवानां आख्यातानां जन्मविशेषादौषधिविशेषान्मंत्रविशेषात्तपो
विशेषाद्वा यः समाधिः स भवप्रत्ययः भवः संसार आत्मानात्मविवेकाभावरूपः प्रत्ययः कारणं
यस्य स तथा जन्ममात्रहेतुको वा पक्षिणामाकाशगमनवत् पुनः संसारहेतुत्वान्मुमुक्षुभिर्हे
य इत्यर्थः श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषां जन्मौषधिमंत्रतपःसिद्धव्यतिरिक्ता
नामात्मानात्मविवेकदर्शिनां तु यः समाधिः स श्रद्धादिपूर्वकः श्रद्धादयः पूर्व उपाया यस्य स तथा
उपायप्रत्यय इत्यर्थः तेषु श्रद्धा योगविषये चेतसः प्रसादः सा हि जननीव योगिनं पाति ततः
श्रद्दधानस्य विवेकार्थिनो वीर्यमुत्साह उपजायते समुपजातवीर्यस्य पाश्चात्त्यासु भूमिषु स्मृ
तिरुत्पद्यते तत्स्मरणाच्च चित्तमनाकुलं सत्समाधीयते समाधिरैकाग्रता समाहितचित्तस्य प्र
ज्ञाभाव्यगोचरा विवेकेनोपजायते तदभ्यासात्पराच्च वैराग्याद्भवत्यसंप्रज्ञातः समाधिर्मुमुक्षू
णामित्यर्थः प्रतिक्षणपरिणामिनो हि भावा ऋते चितिशक्तेरिति न्यायेन तस्यामपि सर्ववृत्ति
निरोधावस्थायां चित्तपरिणामप्रवाहस्तज्जन्यसंस्कारप्रवाहश्च भवत्येवेत्यभिप्रेत्य संस्कारशे
षमित्युक्तं तस्य च संस्कारस्य प्रयोजनमुक्तं ततः प्रशांतवाहिता संस्कारादिति प्रशांतवाहिता
नाम श्रुतवृत्तिकस्य चित्तस्य निरिंधनाग्निवत्प्रतिलोमपरिणामेनोपशमः यथा समिदाज्याद्या
हुतिप्रक्षेपे वह्निरुत्तरोत्तरवृद्ध्या प्रज्वलति समिदादिक्षये तु प्रथमक्षणे किंचित्क्षाम्यति उत्त

विरामप्रत्ययाभ्या
सपूर्वकः संस्कार
शेषोन्यः = २

तस्य चित्तस्योक्तान्निरोधसंस्कारात्प्रशान्तवाहिता भवति परिहृतविक्षेपतया सदृशप्रवाहपरिणामि चित्तं भवतीत्यर्थः = ३

तस्मिन्काले स्वरूपे चिन्मयतनूपतया यामवस्थानं स्थितिर्भवत्तु वृत्तिदशायां प्रवृत्तिकाले भोक्तापि दुःखानां भोक्तेव भवतीति संबंधः

गी॰ टी॰
म॰ ष॰
९

रजस्तमोगुणाधिकमधिकं शाम्यतीति क्रमेणासां निवर्त्यते ॥ तथा निरुद्धचित्ते रजस्तमसाधिकः प्रशमः प्रवर्त्तते
तत्र पूर्वपूर्वप्रशमजनितः संस्कार उत्तरोत्तरप्रशमस्य कारणं । तदोक्तं ॥ निर्विंधनाग्निवच्चित्तं क्र-
मेणोपशाम्यन् व्युत्थानसमाधिनिरोधसंस्कारैः सह स्वस्यां प्रकृतौ लीयते ॥ तदा च समाधि-
परिपाकप्रभवेन वेदान्तवाक्यजेन सम्यग्दर्शनेनाविद्यायां निवृत्तायां तद्धेतुकदृग्दृश्यसंयोगा-
भावात् वृत्तेः पंचविधायामपि निवृत्तायां स्वरूपप्रतिष्ठः पुरुषः शुद्धः केवलो मुक्त इत्युच्यते
तदुक्तं । तदा द्रष्टुः स्वरूपेऽवस्थानमिति । तदा सर्ववृत्तिनिरोधे वृत्तिदशायां तु नित्यापरिणामिचेतन-
रूपत्वेन तस्य सदा शुद्धत्वेऽप्यनादिना दृग्दृश्यसंयोगेनाविवेकेनान्तःकरणतादात्म्याध्यासादन्तःकरण-
वृत्तिसारूप्यं प्राप्नुवन् भोक्तापि भोक्तेव दुःखानां भवति । तदुक्तं । वृत्तिसारूप्यमितरत्र ॥ इतरत्र वृत्ति-
प्रादुर्भावे ॥ एतदेव विवृत्तं ॥ द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थं ॥ चित्तमेव द्रष्टृदृश्योपरक्तं विषयिविष-
यनिर्भासं चेतनाचेतनस्वरूपापन्नं विषयात्मकमप्यविषयात्मकमिवाचेतनमपि चेतन-
मिव स्फटिकमणिकल्पं सर्वार्थमित्युच्यते ॥ तदनेन चित्तसारूप्येण भ्रान्ताः केचित्तदेव चेतन-
मित्याहुः ॥ तदसंख्येयवासनाभिश्चित्रमपि परार्थं संहत्यकारित्वात् ॥ यस्य भोगापवर्गार्थं त-
त्स एव परः स्यान्न तु संहतः पुरुषो न तु घटादिवत्संहत्यकारि चित्तं चेतनमित्यर्थः ॥ एवं च
विशेषदर्शिन आत्मभावभावनानिवृत्तिः ॥ एवं योऽन्तःकरणपुरुषयोर्विशेषदर्शी तस्य
यान्तःकरणे प्रागविवेकवशादात्मभावभावनासीत् सा निवर्त्तते ॥ भेददर्शनेऽसत्यभेदा-
भिमानानुपपत्तेः सत्त्वपुरुषयोर्विशेषदर्शी नैव भगवदर्पि ॥ ॐ नमो भगवते वासुदेवाय

सर्ववृत्तिनिरोधे वृत्तिलोके न तेसति द्रष्टुः =

तदेव चित्तं संख्यातुमशक्याभिर्वासनाभिश्चित्रमपि नानारूपमपि परार्थं परस्य स्वामिनो भोक्तुर्भोगापवर्गलक्ष-
णमर्थं साधयतीति कुतः संहत्यकारित्वात् संहत्य संभूय मिलित्वार्थक्रियाकारित्वात् यच्च संहत्यार्थक्रिया-

श्लोत्र

९

केचि क्रान्तानागताः उदिता वर्त्तमानाः अव्यपदेश्याभविष्यन्तः =३
व्यापयः =

गी॰टी॰
म॰ष
११

कख्यातेर्धर्ममेघः समाधिः प्रसंख्यानं सत्वपुरुषान्यताख्यातिः शुद्धात्मज्ञानमिति यावत् तत्र
बुद्धेः सात्विके परिणामे कृतसंयमस्य सर्वेषां गुणपरिणामानां स्वामिवदाक्रमणं सर्वाधिष्ठा
तृत्वं तेषामेव च शान्तोदिताव्यपदेश्यधर्मित्वेन स्थितानां यथावद्विवेकज्ञानं सर्वज्ञातृत्वं चवि
शोकानाम सिद्धिः फलं तद्वैराग्याच्च कैवल्यफलं सत्वपुरुषान्यताख्यातिमात्रस्य सर्व
भावाधिष्ठातृत्वं सर्वज्ञातृत्वं च तद्वैराग्यादपि दोषबीजक्षये कैवल्यमिति सूत्राभ्यां त त्रयेसति

युंजन्नेवं सदात्मानं योगी नियतमानसः

देवदुच्यते तस्मिन्प्रसंख्यानेऽप्यकुसीदस्य फलमलिप्सोः प्रत्ययान्तराणामनुदये स
र्वप्रकारं विवेकख्यातेः परिपोषाद्धर्ममेघः समाधिर्भवति इज्याचारदमाहिंसादानस्वा
ध्यायकर्मणां अयं तु परमो धर्मो यद्योगेनात्मदर्शनमिति स्मृतेर्धर्मं प्रत्यग्ब्रह्मैक्यसा
क्षात्कारं मेहति सिंच ॥ ॥ ॥ ॥ ॥ राम ॥ ॥ ॥ कृष्ण ॥ ॥ ॥

तीति धर्ममेघस्तत्वसाक्षात्कारहेतुरित्यर्थः ॥ ततः क्लेशकर्मनिवृत्तिः ॥ ततो धर्ममेघात्समाधेर्धर्मा
द्वा क्लेशानां पंचविधानां ॥ अविद्यास्मितारागद्वेषाभिनिवेशानां कर्मणां च कृष्णशुक्लसंकीर्णभे
देन त्रिविधानामविद्याद्वयेबीजद्वयादात्यंतिकी निवृत्तिः कैवल्यं भवति कारणनिवृत्त्या कार्यनि
वृत्तेरात्यंतिकत्वाउचितत्वादित्यर्थः ॥ एवं स्थिते युंजन्नेवं सदात्मानमित्यनेन संप्रज्ञातः समाधिरे
काग्रभूमावुक्तः नियतमानस इत्यनेन तत्फलभूतो ऽसंप्रज्ञातसमाधिर्निरोधभूमावुक्तः शां

शांतिं निर्वाणपरमां ॥ मत्संस्थामधिगच्छति ॥

९५

तिमिति निरोधसमाधिजसंस्कारफलभूतासंप्रज्ञातवाहिता ॥ निर्वाणपरमामिति धर्ममेघ
स्य समाधेः फलतत्वज्ञानद्वारा कैवल्यहेतुत्वं ॥ मत्संस्थामित्यनेनौपनिषदाभिमतं कैवल्यं द
र्शितं ॥ यस्मादेवं महाफलो योगस्तस्मात्तं महता प्रयत्नेन संपादयेदित्यभिप्रायः ॥ ९५ ॥

गी॰टी॰
अ॰६
१२

12

एवंयोगाभ्यासनिष्ठस्याहारादिनियममाह द्वाभ्यां नात्यश्नतस्त्विति यतः अत्यंतं सजीर्यति शरीरस्य
चकार्याक्षमतां संपादयति॥ तदात्मसम्मितमन्नं तदतिक्रम्य लोभेनाधिकमश्नतः न योगोस्ति
अजीर्णादिदोषेण व्याधिपीडितत्वात्॥ न चैकांतमनश्नतोपि योगोस्ति अनाहारादत्यल्पाहा
राद्वा रसपोषणाभावेन शरीरस्य कार्याक्षमत्वात्। यदु ह वा आत्मसम्मितमन्नं तदवति तन्न
हिनस्ति यद्भूयो हिनस्ति तद्यत्कनीयो न तदवतीति शतपथश्रुतेः॥ तस्माद्योगी नात्मसम्मि-
तादन्नादधिकं न्यूनं वाश्नीयादित्यर्थः॥ अथवा॥ पूरयेदशनेनार्धं तृतीयमुदकेन तु॥ वा

नात्यश्नतस्तु योगोस्ति॥ न चैकांतमनश्नतः॥ न चातिस्वप्नशीलस्य॥ जाग्रतो नैव चार्जुन॥१६॥

योः संचरणार्थं तु चतुर्थमवशेषयेदित्यादियोगशास्त्रोक्तपरिमाणादधिकं न्यूनं वाश्न-
तो योगो न संपद्यत इत्यर्थः॥ तथातिनिद्राशीलस्यातिजाग्रतश्च योगो नैवास्ति॥ हे अर्जुन
सावधानो भवेत्यभिप्रायः॥ एकश्चकारः उक्ताहारादिक्रमसमुच्चयार्थः॥ अपरोऽनुक्त
दोषसमुच्चयार्थः॥ यथाह मार्कंडेयपुराणे॥ नाध्मातः क्षुधितः श्रांतो न च व्याकुल-
चेतनः॥ युंजीत योगं राजेंद्र योगी सिद्ध्यर्थमात्मनः॥ नातिशीते न चैवोष्णे न द्वंद्वे ना-
निलान्विते॥ कालेष्वेतेषु युंजीत न योगं ध्यानतत्परः इति॥१६॥॥ ॥ श्रीरामचंद्रजी

एवमाहारादिनियमस्,विरहिणो योगव्यतिरेकमुक्त्वा तन्नियमवतो योगान्वयमाह युक्ताहारेति।
आह्रियत इत्याहारः अन्नं विहरणं विहारः पादक्रमः तौ युक्तौ नियतप्रमाणौ यस्य तथा अन्ये
ष्वपि प्रणवजपोपनिषदावर्त्तनादिषु कर्मसु युक्ता नियतकाला चेष्टा यस्य तथा स्वप्नो निद्राव।
बोधो जागरणं तौ युक्तौ नियतकालौ यस्य तस्य योगो भवति साधनपाटवात्समाधिः सिद्ध्यति
नान्यस्य ॥ एवं प्रयत्नविशेषेण संपादितो योगः किंफल इति तत्राह ॥ दुःखहेति सर्वसंसारदुः
खकारणाविद्यानिर्मूलनहेतुब्रह्मविद्योत्पादकत्वात्समूलसर्वदुःखनिवृत्तिहेतुरित्यर्थः

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ॥ युक्तस्वप्नावबोधस्य योगो भवति दुःखहा

१७

अन्नाहारस्य नियतत्वं । अर्द्धं सव्यंजनान्नस्य तृतीयमुदकस्य तु । वायोः संचरणार्थं तु चतुर्थमवशे
षयेदित्यादि प्रागुक्तं ॥ विहारस्य नियतत्वं योजनान्न परं गच्छेदित्यादि कर्मसु चेष्टाया नियतत्वं वा
प गादिचापल्यपरित्यागः । रात्रेर्विभागत्रयं कृत्वा प्रथमांत्ययोर्जागरणं मध्ये स्वप्नमिति स्वप्नाव
बोधयोर्नियतकालत्वं ॥ एवमन्येपि योगशास्त्रोक्ता नियमा द्रष्टव्याः ॥ १७ । श्रीरामजी सहा

गी॰टी॰ एवमेकाग्रभूमौ संप्रज्ञातं समाधिमभिधाय निरोधभूमावसंप्रज्ञातं समाधिं वक्तुमुपक्रमते यदेति
अ॰ ६ यदा यस्मिन्काले परवैराग्यवशाद्विनियतं विशेषेण नियतं सर्ववृत्तिशून्यतामापादितं चित्तं वि
१३ गलद्रजस्तमस्कमन्तःकरणसत्त्वं ॥ सत्त्वकृतात्सर्वविषयाकारग्रहणसामर्थ्यमपि सर्वेणानिरुद्धवृ
त्तिकत्वादात्मन्येव प्रत्यक्चिति अनात्मानुपरक्ते वृत्तिराहित्येऽपि स्वतःसिद्धस्यात्माकारस्य वार
यितुमशक्यत्वात् स्थितेरेव प्राधान्यादवभूतं सदवतिष्ठते निश्चलं भवति ॥ तदा तस्मिन्सर्ववृ-

13

यदा विनियतं चित्तम् ॥ आत्मन्येवावतिष्ठते ॥ निःस्पृहः सर्वकामेभ्यो ॥ युक्त इत्युच्यते तदा ॥

१८

त्तिनिरोधकाले युक्तः समाहित इत्युच्यते कः यः सर्वकामेभ्यो निःस्पृहः । विगलितदोषदर्श
नेन सर्वेभ्यो दृष्टादृष्टविषयेभ्यः कामेभ्यः स्पृहाशून्यः अयमेवेति परं वैराग्यमसंप्रज्ञातस
माधेरन्तरङ्गसाधनमुक्तं तथा च व्याख्यातं प्राक् ॥ १८ ॥ राम ॥ राम ॥ श्रीराम ॥ ॥

धौ

समाधेर्निर्दृष्टान्तिकस्य चित्तस्योपमानमाह यथादीपइति। दीपचलनहेतुनावातेनवायुनावर्जिते
देशेस्थितोदीपोयथाचलनहेतुस्वभाववान्नेंगतेनचलतिसोपमास्मृता॥ सदृष्टान्तत्वेनस्मृतोयोग
ज्ञैः। कस्ययोगिनएकाग्रभूमौसंप्रज्ञातसमाधिमतोभ्यासपाटवाद्यतचित्तस्यनिरुद्धसर्ववृ
त्तेरसंप्रज्ञातसमाधिरूपंयोगंनिरोधभूमौयुंजतोनुतिष्ठतः॥ यस्मात्मंतःकरणंतस्यनिश्च अन्तःकरण स्य =
लतयासत्त्वोद्रेकेणप्रकाशकतयाचनिश्चलोदीपोदृष्टान्तइत्यर्थः आत्मनोयोगंयुंजतइति।

यथादीपोनिवातस्थो। नेंगतेसोपमास्मृता। योगिनोयतचित्तस्य। युंजतोयोगमात्मनः॥
१९

व्याख्यानेदार्ष्टान्तिकालाभः सर्वावस्थस्यापिचित्तस्यसर्वदात्माकारतयाआत्मपदवैयर्थ्यंच। नहि
योगिनात्माकारताचित्तस्यसंपाद्यतेकिंतुस्वतएवआत्माकारस्यसतअनात्माकारतानिवर्त्यतइति
तस्माद्दार्ष्टान्तिकप्रतिपादनार्थमेवात्मपदं। यतचित्तस्येतिवाभावप्रधानोनिर्देशःकर्मधारयोवायतस्यचि

गी॰टी॰ एवंसामाधानेन समाधिमुक्त्वा निरोधसमाधिं विलक्षणं विवरीतुमारभते यत्रेति ॥ यत्र यस्मि
अ॰६ न्परिणामविशेषे योगसेवया योगाभ्यासपाटवेन जाते सति चित्तं निरुद्धमेकविषयकवृत्ति
१५ प्रवाहरूपामेकाग्रतां त्यक्त्वा निरिंधनाग्निवदुपशाम्यन्निर्हेतुकं तथा सर्ववृत्तिनिरोधरूपेण
परिणतं भवति ॥ यत्र च यस्मिंश्च परिणामे सति आत्मनो रजस्तमोनभिभूतशुद्धसत्वमा
त्रेणांतःकरणेनात्मानं प्रत्यक्चैतन्यं परमात्माभिन्नं सच्चिदानंदघनमनंतमद्वितीयं प।

यत्रोपरमते चित्तं । निरुद्धं योगसेवया । यत्र चैवात्मनात्मानं । पश्यन्नात्मनि तुष्यति । २०

श्यन्वेदांतप्रमाणजया वृत्त्या साक्षात्कुर्वन्नात्मन्येव परमानंदघने तुष्यति न देहेंद्रियसंघा
तेन वा न ह्रोगेः न्यत्र परमात्मरूपीते सम्यक् छिद्रैरव भावानुष्ठाने तुष्टिं तिवा ॥ नमंतःकरणपरिणामं
सर्वसिद्धिरहितं निरोधरूपं योगं विषयादितिरोधानयः ॥ यत्र काले इति तव्याख्यानमस्यायुतक्तं

१५

आत्मनैवतोषमेति न मा हं सुखवानिति ॥ यत्र यस्मिन्नवस्थाविशेषे आत्यंतिकमनंतं निरतिशयं ब्रह्मसुखरूपं
अतीन्द्रियं विषयेन्द्रियसंयोगानभिव्यंग्यं बुद्धिग्राह्यं बुद्ध्यैव रजस्तमोमलरहितया सत्त्वमात्रवाहि-
न्या ग्राह्यं सुखं योगी वेत्ति अनुभवति यत्र च स्थितोऽयं विद्वांस्तत्त्वत आत्मस्वरूपान्नैव चलति । तं यो-
गसंज्ञितं विद्यादिति परेणान्वयः समानः ॥ अत्रात्यंतिकमिति ब्रह्मसुखस्वरूपकथनं । अतीन्द्रि-
यमिति विषयसुखव्यावृत्तिः ॥ तस्य विषयेन्द्रियसंयोगसापेक्षत्वात् ॥ बुद्धिग्राह्यमिति सौषुप्त-
सुखव्यावृत्तिः सुषुप्तौ बुद्धेर्लीनत्वात् समाधौ निर्वृत्तिकायास्तस्याः सत्त्वात् ॥ तदुक्तं गौडपादैः
लीयते तु सुषुप्तौ तन्निगृहीतं न लीयत इति ॥ तथा च श्रूयते समाधिनिर्धूतमलस्य चेतसो निवे-

सुखमात्यंतिकं यत्तद् । बुद्धिग्राह्यमतीन्द्रियं । वेत्ति यत्र न चैवायं । स्थितश्चलति तत्त्वतः ॥ २१ ॥

शितस्यात्मनि यत्सुखं भवेत् । न शक्यते वर्णयितुं गिरा तदा यदेतदंतःकरणेन गृह्यत इति । अं-
तःकरणेनेति कृत्स्नवृत्तिकेनेत्यर्थः ॥ कृत्स्नात्तु सुखास्वादं गौडपादाचार्यैस्तत्प्रतिषिद्धं । ना-
स्वादयेत्सुखं तत्र निःसंगः प्रज्ञया भवेदिति ॥ महदिदं सुखं समाधावनुभवामीति सविकल्पवृ-
त्तिरूपा प्रज्ञा सुखास्वादः तं व्युत्थानरूपत्वेन समाधिविरोधित्वाद्योगी न कुर्यात् ॥ अनयैवमा-
हृष्या प्रज्ञया सह संगं परित्यजेत्तां निरुंध्यादित्यर्थः । निर्वृत्तिकेन तु चित्तेन तत्स्वरूपसुखानुभू-
वेत्तैः प्रतिपादितः स्वस्थं शांतं सनिर्वाणमकथ्यं सुखमुत्तममिति ॥ स्पष्टं चैतदुपरिष्टात्करिष्यते

गी॰टी॰
न॰ ६
१५

यत्र नचैवायं स्थितश्चलति तत्त्वतस्तत्स्वरूपान्न प्रपादयति यं लब्ध्वेति ॥ यं च निरतिशयात्मसुखव्यंज
कं निर्हृत्तिकं चित्तावस्थाविशेषं लब्ध्वा सततान्यासपरिपाकेन संप्राप्यापरं लाभं ततोधिकं न मन्य
ते ॥ कृतकृत्यः प्राप्तप्राप्तव्योऽसौ आत्मलाभान्न परं विद्यत इति स्थितः ॥ एवं विषयभोगवासनयासं
नयोऽसमये विचलनं नास्तीत्युक्त्वा शीतवातमशकाद्युपद्रवनिवारणार्थमपि तन्नास्तीत्याह
यस्मिन्परमात्मसुखमये निर्हृत्तिकाचित्तावस्थाविशेषे स्थितो योगी गुरुणा महता शस्त्रनि
पातादिनिमित्तेन महतापि दुःखेन न विचाल्यते किमुत द्वंद्वरोगात्यर्थः ॥२२॥ तं विद्यादिति

यं लब्ध्वा चापरं लाभं । मन्यते नाधिकं ततः । यस्मिन्स्थितो न दुःखेन । गुरुणापि विचाल्यते २२ ।

यत्रोपरमत इत्यारभ्य बहुभिर्विशेषणैर्यो निर्हृत्तिकः परमानंदाभिव्यंजकश्चित्तावस्थाविशे
षउक्तः तं चित्तवृत्तिनिरोधं चित्तवृत्तिमयसर्वदुःखविरोधित्वेन दुःखवियोगमेव संतं योगसंज्ञि
तं वियोगशब्दार्हमपि विरोधिलक्षणया योगशब्दवाच्यं विद्याज्जानीयात् ननु योगशास्त्रान
रोधात् केचित्तं वयं प्रतिपद्येत इत्यर्थः तथा च भगवता पतंजलिना सूत्रयत् ॥ योगश्चित्तवृत्ति
निरोध इति ॥ योगो भवति दुःखहेति यदुक्तं तदेतदुपसंहृतं एवंभूते योगे निश्चयानि
र्वेदयोः साधनत्वविधानायाह ॥ स इति योगः फलो योगः निश्चयेन शास्त्राचार्यवचनतात्पर्य
विषयार्थः तस्यापरोक्षत्वाप्यवसायेन योक्तव्योभ्यसनीयः ॥ अनिर्विण्णचेतसा ॥ ॥॥॥

प
ना
15

वतापिकालेनयोगेनसिद्धः किमतः परं कष्टमित्यनुतापो निर्वेदस्तद्रहितेनचेतसा इहजन्मनिज
न्मांतरेवाक्षेस्यनिर्विकित्वर्दयेत्येवंधैर्ययुक्तेनमनसेत्यर्थः ॥ तदेतदुक्तंगौडपादाचार्यैः ॥ उत्सेकउ
दधेर्यद्वत्कुशाग्रेणैकविंदुना ॥ मनसोनिग्रहस्तद्वद्भवेदपरिखेदतः इति उत्सेकउत्सेचनंशोष
णाध्यवसायेनजलोद्धरणमितियावत् अत्रसंप्रदायविदआख्यायिकामाचक्षते ॥ कस्यचि
त्किलपक्षिणोंऽडानितीरस्थानितरंगवेगेनसमुद्रोपजहार ॥ सचसमुद्रंशोषयिष्याम्येवेति
प्रवृत्तः ॥ स्वमुखाग्रेणैकैकंजलविंदुमपरिश्रांतश्चिक्षेप ॥ तदाचबहुभिःपक्षिभिर्बंधुवर्गैर्वा

तंविद्याद्दुःखसंयोग ॥ वियोगंयोगसंज्ञितं ॥ सनिश्चयेनयोक्तव्यो ॥ योगोनिर्विण्णचेतसा ॥ २३

यमाणोपिनचोपरराम ॥ यदृच्छयाचतत्रागतेननारदेनमुनिनानिवारितोप्यस्मिञ्जन्मनिजन्म
न्मांतरेवायेनकेनाप्युपायेनसमुद्रंशोषयाम्येवेतिप्रतिजज्ञे ॥ ततश्चदैवानुकूल्यात्कृपालु
र्नारदोमुनिर्गरुडंतत्सहायायाप्रेषयामास ॥ समुद्रस्त्वज्ञातिद्रोहंरागात्वा ॥ मत्वमत्यतइतिव
चनेनततोगरुडपक्षवातेनशुष्यन्समुद्रोभीतस्तान्यंडानितस्मैपक्षिणेप्रददाविति ॥ एवम
खेदेनमनसोनिरोधेपरमधर्मेप्रवर्तमानंयोगिनमीश्वरोनुगृह्णाति ॥ ततश्चपक्षिणइववल्लस्याभि

किं च कृत्वा योगोभ्यसनीय इत्याह संकल्पेति ॥ संकल्पो दृष्टेष्वपि विषयेष्व शोभनत्वादर्शी भना नेन शो
ध्यासः ॥ तस्माज्ज संकल्पादिदं मे स्यादिदं मे स्यादित्येवंरूपाः कामाः प्रभवंति तान् शोभना
ध्यासप्रभवान् कामान् विषयाभिलाषान् विचारजन्या शोभनत्वनिश्चयेन शोभनाध्यास
बाधाद् दृष्टेषु स्रक्चंदनवनितादिषु अदृष्टेषु चेंद्रलोकपारिजातादिषु सर्वःप्रभृतिषु स्वर्वा

संकल्पप्रभवान्कामां त्यक्त्वा सर्वानशेषतः ॥ मनसैवेंद्रियग्रामं ॥ विनियम्य स
मंततः ॥२४॥

न्तादयस्सर्वास्तानेव सर्वान् ब्रह्मलोकपर्यन्तानशेषतः निरवशेषात्सवासनां त्यक्त्वा त्यए
वकामपूर्वकत्वादिंद्रियप्रवृत्तेस्तदपायेसति विवेकयुक्तेन मनसैवेंद्रियग्रामं चक्षुरा
दिकरणसमूहं विनियम्य समंततः सर्वेभ्यो विषयेभ्यः प्रत्याहृत्य शनैः शनैरुपरमेदि

त

त्त

ममिकाङ्क्षयक्रमेणाशनैः शनैरुपरमेत् । धृतिर्धैर्यमविच्छिन्नता तया गृहीतया बुद्ध्या वशीकर्तव्यताति
शयस्वरूपात याव दा कदाचिदवश्यं भविष्यत्येव योगः किं त्वरयेत्येवंरूपया शनैः शनैः शुद्धरूपं दिदृ
क्षोर्वशगमनो नानिरुंध्यात् ॥ एतेनानिर्वेदनिश्चयौ अभ्यासोदर्शितौ ॥ तथा च श्रुतिः ॥ यच्छेद्वाङ्मन
सी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि ॥ ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनीति वागिति
वाचं लौकिकीं वैदिकीं च लक्ष्यापारं मनसि व्यापारवति नियच्छेत् तत्रान्यथायाहं हृच्छशद्वान्वा
चो विग्लापनं हि तदिति श्रुतेः ॥ वाग्वृत्तिनिरोधेन मनोवृत्तिमात्रशेषो भवेदित्यर्थः । चक्षुरा
दिनिरोधोपि एतस्याभिमेतो द्रष्टव्यः मनसीति छांदसं दैर्घ्यं मनस्तन्मनः के भेद्व यज्ञाने द्रियसंहृ
कादिनानाविषयविकल्पसाधनं करणं ज्ञाने जानातीति ज्ञानमिति व्युत्पत्त्या ज्ञातर्यात्मनि ज्ञातृत्वो
पाधावहंकारे नियच्छेत् ॥ मनो व्यापारान् त्यक्त्वा ज्ञात्र्यहंकारमात्रं परिशेषयेत् । न च ज्ञानं ज्ञात
त्वोपाधिमहंकारमात्मनि महति महत्त्वे सर्वव्यापके नियच्छेत् । द्विविधो ह्यहंकारो विशेषरू
पः सामान्यरूपश्चेति अयमहमेतस्य पुत्र इत्येवं व्यक्तमभिमन्यमानो विशेषरूपो व्यष्ट्यहंकारः
अस्मीत्येतावन्मात्रमभिमन्यमानः सामान्यरूपः समष्ट्यहंकारः स च हिरण्यगर्भो महानात्मेति
च सर्वानुस्यूतत्वादुच्यते । ताभ्यामहंकाराभ्यां विविक्तो निरुपाधिकः शान्तात्मा सर्वान्तरश्चिदेक
रसस्तस्मिन्महान्तमात्मानं समष्टिबुद्धिं नियच्छेदेवं तत्कारणमव्यक्तमपि नियच्छेत्ततो निरुपाधि
कत्वंपदलक्ष्यः शुद्ध आत्मा साक्षात्कृतो भवति । शुद्धे हि चिदेकरसे प्रत्यगात्मनि ज्ञदृशा
क्तिरूपमनिर्वाच्यमव्यक्तं प्रकृतिरुपाधिः ॥ सा च प्रथमं सामा । ॥ श्रीरामजीसहा ॥॥॥

गी॰टी॰
म॰ब
१८

न्याहंकाररूपं महत्तत्त्वं नाम धृत्वाव्यक्तीभवति ॥ ततो बहिर्विशेषाहंकाररूपेण ततो बहिर्मनोरूपेण ।
ततो बहिर्वागादीन्द्रियरूपेणेति तदेतत्कठवल्लीष्वभिहितं । इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः मन
सस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ॥ महतः परमव्यक्तमव्यक्तात्पुरुषः परः ॥ पुरुषान्न परं किंचि
त्सा काष्ठा सा परा गतिरिति ॥ तत्र गवादिष्विव वाग्विरोधः प्रथमा भूमिः ॥ १ ॥ बालमूकादिष्विव
निर्मनस्त्वं द्वितीया ॥ २ ॥ तंद्राभिवाहंकारराहित्यं तृतीया ॥ ३ ॥ सुषुप्ताविव महत्तत्त्वराहित्यं चतु
र्थी ॥ ४ ॥ तदेतद्भूमिकाचतुष्टयमपेक्ष्य शनैः शनैरुपरमेदित्युक्तम् यद्यपि महत्तत्त्वशान्तात्म
नोर्मध्ये महत्तत्त्वोपादानमव्याकृताख्यं तत्त्वं श्रुत्योदाहारि ॥ तथापि तत्र महत्तत्त्वस्य नियमेनैना

शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया ॥ [illegible]

अथापि सुषुप्ताविव स्वरूपलयप्रसंगात् तस्य च कर्मेत्ययेस्मिन्पुरुषप्रयत्ने मन्तव्याः स्व
त एव सिद्धत्वात्तत्त्वदर्शनानुपयोगित्वाच्च इत्युपेतत्वग्रयाद्वाशङ्कयाहुरात्मसंस्थं मन इति
पूर्वमभिधाय तत्त्वसिद्धये निरोधमात्रापेक्षाभिधानात् ॥ तत्त्वदिदृक्षोर्दर्शनसाधनत्वे
नदृष्टतत्त्वस्य तु जीवन्मुक्तिरूपं [illegible] पायापेक्षितः ॥ न तु शान्तात्मस्वरूपं स्वचित्तस्पष्ट
निरहितत्वेन स्वप्रभवत्वदर्शनहेतुत्वमिति चेत् ॥ स्वतःसिद्धस्य दर्शनस्य निवारयितुमश
क्यत्वात् । तदुक्तं आत्मानात्माकारं स्वभावतोवस्थितं सदा चित्तम् आत्मैकाकारतया निरस्त

१८

निरोधसमाधिः ८

लौ

स्वतो विषयस्फूर्त्तिर्णैवोत्पद्यते ॥ जलतंडुलादिहरणं तु तत्त्वचेष्टेयमात्मानुभवप्रयत्नेन भवति ॥ तत्र जला
दौ निःस्पादितेऽपि विषयत्विःस्पादयितुं न शक्यते ॥ सुखेऽपि ध्यानेऽप्युत्तरीयं यदवतिष्ठत एव ॥ तथा चित्तस्या-
वै त्यंतध्यानेऽपि तन्मूर्त्तिरेवोत्पद्यते अभ्यासेन तस्मिन्नस्थानि निषिक्ते तु ततान्स्वबलस्त्रस्वदुःखादिद्वयं तं
भोगहेतुधर्माधर्महेतुत्त्वात्सामग्रीशाद्भवति तत्र सुखदुःखाद्यनात्माकारवृत्तिरात्मज्ञत्वयाभ्या-
सेन निवारितेऽपि निर्निमित्तस्थिराकाराकारयितुं न शक्यते । ततो निरोधसमाधिना निर्वृत्तिकेन
चित्तेन संस्कारमात्रशेषतयाति सूक्ष्मत्वेन निरूपयितव्यावियदात्ममात्राभिमुखत्वाद्वृत्तिं विनैव

आत्मसंस्थं मनः कृत्वा ॥ न किंचिदपि चिंतयेत् ॥ २५ ॥

श्र निर्विघ्नमात्मानुभूयते । तदेतदाह । आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेदिति आत्मनि तिष्ठ
त्यपि के प्रतीचि संस्थास्तमापि यस्मात्तदात्मसंस्थं सर्वप्रकारवृत्तिशून्यं स्वभावसिद्धात्माकारमा-
युतं त्रविशिष्टं मनः कृत्वा धृतिगृहीतया विवेकबुद्ध्या संपाद्य असंप्रज्ञातसमाधिस्थः सन् किंचि-
दपि अनात्मानमात्मानं वा न चिंतयेत् न वृत्त्या विषयीकुर्यात् ॥ अनात्माकारवृत्तौ हि व्युत्थानमे-
वस्यात् । आत्माकारवृत्तौ च संप्रज्ञातः समाधिरित्यसंप्रज्ञातसमाधिस्थैर्याय कामपि चित्तवृत्तिं

हेतो

निद्रां

गी॰टी॰ अ॰६ १८

एवं निरोधसमाधिं कुर्वन्योगी ॥ शब्दादीनां चित्तविक्षेपहेतूनां मध्ये यतो यतो यस्माद्यस्मान्निमित्तात्कस्मा
द्विषयाद्रागद्वेषादेश्चंचलं विक्षेपाभिमुखं सन्मनो निश्चरति विक्षिप्तं भवत्तत्तद्विषयाभिमुखी
भूतं प्रमाणविपर्ययविकल्पस्मृतीनामन्यतमामपि समाधिविरोधिनीं वृत्तिमुत्पादयति ॥ तथा
लयहेतूनां निद्राशेषबहुभोजनश्रमादीनां मध्ये यतो यतो निमित्तात्स्थिरं लयाभिमुखं सन्म
नो निश्चरति लीनं सत्समाधिविरोधिनीं निद्राख्यां वृत्तिमुत्पादयति ॥ ततस्ततो विक्षेपनिमि
त्ताल्लयनिमित्ताच्च नियम्यैतन्मनो निरुद्धं कृत्वा आत्मन्येव स्वप्रकाशपरमानंदघने वशं नयेन्निरु
ध्यात् यथा न विक्षिप्येत न वा लीयेतेति ॥ एवं कारोऽनात्मगोचरत्वं समाधेर्वीरयति एतच्चोक्तं
गौडाचार्यपादैः ॥ उपायेन निगृह्णीयाद्विक्षिप्तं कामभोगयोः ॥ सुप्रसन्नं लये चैव यथा कामो
लयस्तथा ॥१॥ दुःखं सर्वमनुस्मृत्य कामभोगान्निवर्तयेत् ॥ अजं सर्वमनुस्मृत्य जातं नैव तु
पश्यति ॥२॥ लये संबोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः ॥ सकषायं विजानीयात्समप्राप्तं न चालये
त् ॥ नास्वादयेत्सुखं तत्र निःसंगः प्रज्ञया भवेत् ॥ निश्चलं निश्चरच्चित्तमेकीकुर्यात्प्रयत्नतः ॥३॥
यदा न लीयते चित्तं न च विक्षिप्यते पुनः ॥ अनिंगनमनाभासं निष्पन्नं ब्रह्म तत्तदेति पंचभिः
श्लोकैः ॥ उपायेन वैराग्याभ्यासेन कामभोगयोर्विक्षिप्तं प्रमाणविपर्ययविक
ल्पस्मृतीनामन्यतमयापि वृत्त्या परिणतं मनो निगृह्णीयान्निरुन्ध्यादात्मन्येवेत्यर्थः ॥ काम
भोगयोरिति चिंत्यमानावस्थाभुज्यमानावस्थाभेदेन द्विवचनं ॥ तथा लीयतेऽस्मिन्निति लयः
सुषुप्तिस्तस्मिन्सुप्रसन्नमायासवर्जितमपि मनो ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

म

१८

18

स्थिरीभूयादेव। स एवं प्रयत्नेन कृतो नियम्यते। तत्राह। यथा कामो विषयगोचरप्रमाणादिवृत्त्युत्पादने
न समाधिविरोधी तथा लयोऽपि निद्राख्यवृत्त्युत्पादनेन समाधिविरोधी। सर्ववृत्तिनिरोधो हि समाधिः
अतः कामादिकृतात् विक्षेपादिव प्रमादिकृतात् लयादपि मनो निरोद्धव्यमित्यर्थः॥१॥ उपायेन निगृह्णी
यादित्येतदुच्यते॥ सर्वं द्वैतमविद्याविजृम्भितमल्पं दुःखमेवेत्यनुस्मृत्य यो वै भूमा तत्सुखं नाल्पे सु
खमस्ति। अथ यदल्पं तन्मर्त्यं तद्दुःखमिति श्रुत्यर्थं गुरूपदेशादनु पश्चात्पर्यालोच्य कामान्प्रियु
त्यमानावस्थायां विषयान्भोगान्भुज्यमानावस्थायां च विषयान्निवर्तयेत्। मनस्तः सकाशादिति
शेषः॥ कामश्च भोगश्च कामभोगं तस्मात्तन्मनो निवर्तयेदिति वा॥ एवं द्वैते सर्वदा कालेऽवैराग्य
भावनोपाय इत्यर्थः॥ द्वैतविस्मरणं लयपरमोपाय इत्याह॥ अजं ब्रह्म सर्वं न ततोऽतिरिक्तं किंचिदस्ती
ति शास्त्राचार्योपदेशादनन्तरमनुस्मृत्य तद्विपरीतं द्वैतजातं न पश्यत्येव अधिष्ठाने ज्ञाते क
ल्पितस्याभावात्॥ पूर्वोपायापेक्षयायं बलवानुपाय इति सूचनार्थस्तुशब्दः॥२॥ एवं वैराग्यभावनातत्त्व
दर्शनाभ्यां विषयेभ्यो निवर्तमानं चित्तं यदि दैवादिना लयाभ्यासवशाल्लयाभिमुखं भवेत्तदा
निद्राशेषाजीर्णबहुभोजनश्रमाणां लयकारणानां निरोधेन चित्तं सम्यक्प्रबोधयेदित्या लयप्रयत्ने
न यदि पुनरेवं प्रबोध्यमानं चित्तं दैवादिना प्रबोधाभ्यासवशात्कामभोगयोर्विक्षिप्तं स्यात्तदा वै
राग्यभावनया तत्त्वसाक्षात्कारेण च पुनः शमयेत्। एवं पुनः पुनरभ्यस्यतो लयात्संबोधितं विष
येभ्यश्च व्यावर्तितं नापि समप्राप्तमन्तरालावस्थं चित्तं स्तब्धीभूतं सकषायं रागद्वेषादिप्रबलवासना

गी॰टी॰
अ॰६
३९

स्तब्धीभावाख्येन कषायेण रागादोषेण रागयुक्तं विजानीयात्समाहितं चित्तं विवेकेन जानीयात् ॥ ततः पुनरिदं
समाहितमित्यवगम्य लयविक्षेपाभ्यामिव कषायादपि चित्तं निरुंध्यात् ॥ ततस्तु लयविक्षेपक
षायेषु परिहृतेषु परिशेषाच्चित्तेन समं ब्रह्म प्राप्यते । तच्च समप्राप्तं चित्तं कषायलयभ्रांत्या न
चालयेत् विषयाभिमुखं न कुर्यात् ॥ किंतु धृतिगृहीतया बुद्ध्या लयकषायभ्रमे विविच्य तस्या
मेव समप्राप्तावतिप्रयत्नेन स्थापयेत् तत्र समाधौ परमसुखं वस्तुजं केवलं सुखं नास्वादयेत्
प्रज्ञावंतं कालमहं सुखीति सुखास्वादरूपां प्रवृत्तिं न कुर्यात् समाधिभंगप्रसंगादिति प्रागे

॥ यतो यतो निश्चरति । मनश्चंचलमस्थिरं ॥ ।

व कृतव्याख्याने ॥ प्रज्ञया यदुपलभ्यते तत्सुखं तदविद्यापरिकल्पितं मृषैवेत्येवं भावनया निः
स्पृहो निःस्पृहः सर्वसुखेषु भवेत् ॥ अथवा प्रज्ञया सविकल्पसुखोपलब्धिरूपया समस्तं सुखं प
रित्यजेत् ॥ ततः स्वरूपसुखमपि निर्हृतिकेन चित्तेन नानुभवेत् स्वभावप्राप्तस्य तस्य वा
रयितुमशक्यत्वात् ॥ एवं सर्वतो निवर्त्य निश्चलं प्रयत्नवशेन कृतं चित्तं स्वभावचांचल्या
द्विषयाभिमुखतया निश्चरत् बहिर्निर्गच्छत् एकाग्रतामापाद्य प्रयत्नतः निरोधप्रयत्नेन समे
ब्रह्मण्युपकर्तानयेत् ॥ समप्राप्तं चित्तं कौ ॥ श्रीरामजी सहाय ॥ ॥ ॥ राम ॥ कृष्ण ॥

का

३९

दृशामित्युच्यते ॥ यदा तल्लीयते नापि स्तब्धीभवति नाभसत्त्वमाप्नेन लयशब्देनैव स्तब्धीभावस्योपलक्षणा
त्तन्न च विक्षिप्यते पुनः न च शब्दाद्याकारवृत्तिमनुभवति नापि सुखमास्वादयति ॥ राजसत्वमास्य
न सुखास्वादस्यापि विक्षेपशब्देनोपलक्षणात् ॥ पूर्वभेदनिर्देशस्तु श्लथकप्रयत्नकरणाय प
वं लयकषायाभ्यां विक्षेपसुखास्वादाभ्यां रहितमनिंगनमिंगनं चलनं सवातप्रदीपवत् लया
भिमुखत्वद्रूपं तद्रहितं निर्वातप्रदीपकल्पमनाभासं तके न चिद्विषयाकारेणाभासत इति तत्
कषायसुखास्वादयोरुभयोरभावउक्तं एवं यदैवं दोषचतुष्टयरहितं चित्तं भवति तदा चित्तं

॥ ततस्ततो नियम्यैत । दात्मन्येव वशं नयेत ॥ २६

ब्रह्मनिष्पन्नं समं ब्रह्म प्राप्तं भवतीत्यर्थः ॥ एतादृशश्च योगः श्रुत्या प्रतिपादितः । यदा पंचावतिष्ठं
२ ते ज्ञानानि मनसा सह ॥ बुद्धिश्च न विचेष्टते तामाहुः परमां गतिं ॥ तां योगमिति मन्यंते स्थिरा
मिंद्रियधारणाम् अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययाविति ॥ एतन्मूलकमेव च यो
गश्चित्तवृत्तिनिरोध इति सूत्रं ॥ तस्मायुक्तमुक्तं । ततस्ततो नियम्यैतदात्मन्येव वशं नयेदिति २६

गी॰टी॰
अ॰६॰
२९

20

एवं योगाभ्यासबलादस्यैव योगिनः प्रशाम्यति मनः तत्र च ॥ प्रकर्षेण शान्तं निवृत्तविक्षेपतया
निरुद्धं संस्कारमात्रशेषं मनो यस्य तं प्रशान्तमनसं हीति स्फुटं एतया निर्मलत्वकर्तृत्वनिर्मलत्वे हे
तुगर्भं विशेषणद्वयं शान्तरजसमकल्मषमिति ॥ शान्तं विक्षेपकं रजो यस्य तं विक्षेपशून्यं
तथा न विद्यते कल्मषं लयहेतुस्तमो यस्य तमकल्मषं लयशून्यं प्रशान्तरजसमित्यनेनैव त
मोगुणोपलक्षणोऽस्य कल्मषं संसारहेतु धर्माधर्मादि वर्जितमिति वा ॥ ब्रह्मभूतं ॥ ब्रह्मैव

प्रशान्तमनसं ह्येनं । योगिनं सुखमुत्तमं । उपैति शान्तरजसं । ब्रह्मभूतमकल्मषम् ॥ ॥
॥२७॥

सर्वमिति निश्चयेन समं ब्रह्म प्राप्तं जीवन्मुक्तमेनं योगिनमुक्तमेनं प्रकारेणेति श्रीधरः ॥ उ
त्तमं निरतिशयं सुखमुपैति उपगच्छति । मनस्तत्कृत्योरभावे सत्तागुणौ सत्त्वरूपसुखाविर्भावप्र
सिद्धिं द्योतयति हि शब्दः ॥ तथा च श्रीगव्याख्यातं सुखमात्यन्तिकं यत्तदित्यत्र ॥ २७ ॥ राम ॥ ॥ २९

युंजन्नेवं सदात्मानं योगी विगतकल्मषः सुखेन ब्रह्मसंस्पर्शमत्यंतं सुखमश्नुते = १२८

ॐ

ॐ स्वरूपं योगिनः स्फुटीकरोति ॥ एवं मनसेंद्रियग्राममित्याद्युक्तक्रमेणात्मानं मनः । सदा युंजन्समा
दधत् योगी योगेन नित्यसंबंधी विगतकल्मषः विगतमलः संसारहेतुधर्माधर्मरहितः सुखेनानाया
संस्पर्श सेनेश्वरप्रणिधानात्सर्वांतरायनिवृत्त्या ब्रह्मसंस्पर्शं न विषयास्पर्शेन स्वरूपेण स्पर्शत्वाद ।
न्य यस्मिंस्तत् विषयासंस्पर्शि ब्रह्मस्वरूपमित्येतत् अत एव तत्सर्वांतरंतात्यविकदा अतिक्रांतनि
रतिशयं सुखं आनंदमश्नुते व्याप्नोति । सर्वांतरायनिवृत्तिकेन चित्तेन लयविक्षेपविलक्षणमनुभ
वति ॥ विक्षेपे ह्रिसत्वात् ॥ लये च मनसोपि स्वरूपेणासत्वात् ॥ सर्वद्वंद्वनिर्मुक्तेन स्वरूपेण मनसा
सुखानुभवः समाधावेवेत्यर्थः ॥ अत्र चानायासेनेत्यंतरायनिवृत्तिरुक्ता । ते चांतराया दर्शि
ता योगसूत्रेण ॥ व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रांतिदर्शनालब्धभूमिकत्वानवस्थि
मै तत्वानि चित्तविक्षेपास्तेंतरायाः चित्तं विक्षिपंति योगादपनयंतीति चित्तविक्षेपाः योगप्रतिप
क्षाः । संशयभ्रांतिदर्शनाभ्यां तु वृत्तिरूपतया वृत्तिनिरोधस्य साक्षात्प्रतिपक्षौ व्याध्यादयस्तु स
महवृत्तिसहचरिततया तत्प्रतियत्नानुत्थथः । व्याधिः धातुवैषम्यनिमित्तो विकारो ज्वरादिः
१ । स्त्यानमकर्मण्यता गुरुगणाशिद्यमानाशास्य व्यासनादिकमानहेतेति यावत् योगः साधनी
यो न वेत्युभयकोटिस्पृग्विज्ञानं संशयः अतद्रूपप्रतिष्ठेन विपर्ययेणांतर्गतोपि सन्नुभयको
टिस्पर्शित्वेककोटिस्पर्शित्वरूपावांतरविशेषविवक्षया विपर्ययाद्भेदेनोक्तः ॥३॥ प्रमादः
समाधिसाधनानामनुष्ठानसामर्थ्येप्यननुष्ठानशीलता विषयांतरव्यासंगतया योगसाधनेषु ।
ना

यो॰टी॰
नं॰ ४
२१

त्यश्लेष्मकफादिना तमसा च कायचित्तयोर्गुरुत्वं व्याधित्वेनाप्रसिद्धमपि योगविषये प्रवृत्तिविरोधि
५ अविरतिश्चित्तस्य विषयविशेषे प्राकृतिको ऽभिलाषः । ६ । भ्रान्तिदर्शनं योगासाधने ऽपि तत्साधनत्व
बुद्धिः तथा तत्साधने ऽप्यसाधनत्वबुद्धिः । ७ ॥ अलब्धभूमिकत्वं समाधिभूमेरेकाग्रताया अलाभः
क्षिप्तमूढविक्षिप्तरूपत्वमिति यावत् । ८ । अनवस्थितत्वं लब्धायामपि समाधिभूमौ प्रयत्नशैथि
ल्याच्चित्तस्य तत्राप्रतिष्ठितत्वम् । ९ । त एते चित्तविक्षेपा नव योगमला योगप्रतिपक्षाः योगान्त
राया इति चाभिधीयन्ते । दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासाः विक्षेपसहभुवः । दुःखं
चित्तस्य राजसः परिणामो बाधनालक्षणः ॥ तच्चाध्यात्मिकं शारीरं मानसं च व्याधिवशात्का
मादिवशाच्च भवति । आधिभौतिकं व्याघ्रादिजनितं आधिदैविकं ग्रहपीडादिजनितमहेतुबाध्य
विपर्ययहेतुत्वात्समाधिविरोधि । १ । दौर्मनस्यमिच्छाविघातादिबलाद्दुःखानुभवजनितश्चि
त्तस्य तामसः परिणामविशेषः दौर्भाग्यपर्यायः स्तब्धीभावः स च कषायत्वात्त्याज्य यतः समाधिवि
रोधी । २ । अङ्गमेजयत्वमङ्गकम्पनमासनस्थैर्यविरोधि । ३ । प्राणेन बाह्यस्य वायोरन्तःप्रवेशनं
श्वासः समाध्यङ्गरेचकविरोधी । ४ । प्राणेन कोष्ठ्यस्य वायोर्बहिर्निःसरणं प्रश्वासः समाध्यं
गपूरकविरोधी । ५ । समाहितचित्तस्यैते न भवन्तीति विक्षिप्तचित्तस्यैव भवन्तीति विक्षेपसह
भुवोऽन्तराया एव ॥ एतेऽभ्यासवैराग्याभ्यां निरोद्धव्याः ईश्वरप्रणिधानेनवती तीव्रसंवेगाना
मासन्नः समाधिलाभः प्रस्तुते ॥ ईश्वरप्रणिधानादित्युक्तं तत्र कः ईश्वरस्वरूपमाह प्रणिधेयमीश्वरं क्ले
शकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः । तत्र निरतिशयं सर्वज्ञबीजम् ... वेषा
क्लिश्यन्त इति क्लेशा अविद्यादयो वक्ष्यमाणाः विहितप्रतिषिद्धव्यामिश्ररूपाणि कर्माणि विप
च्यन्त इति विपाकाः कर्मफलानि जात्यायुर्भोगाः आफलविपाकाच्चित्तभूमौ शेरत इत्याशया वासनाः

मपिगुरुः कालेनानवच्छेदादिति त्रिभिः सूत्रैः प्रतिपादितत्प्रणिधानेश्वराभ्यामस्तु च यत् । तस्य
वाचकः प्रणवः तज्जपः तदर्थभावनमिति । ततः प्रत्यक्चेतनाधिगमोप्यन्तरायाभावश्च ततः
स्व प्रणवजपरूपात्तदर्थध्यानरूपाच्चेश्वरप्रणिधानात् प्रत्यक्चेतनस्य पुरुषस्य प्रकृतिविवेके । धि
नाधिगमः साक्षात्कारो भवति । उक्तानामन्तरायाणामभावो भवतीत्यर्थः । अभ्यासवैरा ।
ग्याभ्यामन्तरायनिवृत्तौ कर्तव्यायामभ्यासदार्ढ्यार्थमाह । तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः ।

युंजन्नेवं सदात्मानं । योगी विगतकल्मषः ।

तेषामन्तरायाणां प्रतिषेधार्थमेकस्मिन्कस्मिंश्चिदभिमते तत्त्वे ऽभ्यासश्चेतसः पुनः पुनर्निवेशनं वे
कार्यम् । तथा । मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चि
त्तप्रसादनम् । १ करुणा कृपा २ मुदिता हर्षः ३ उपेक्षा औदासीन्यम् ४ सुखवादिशोढेस्तहं
मैत्री

गी॰टी॰ अ॰६ २२

22

प्राणिषुसुखसंभोगापन्नेषुसाध्वेतन्ममापिमित्राणांसुखित्वमितिमैत्रींभावयेन्नत्वीर्ष्याम्।१।दुःखि
तेषुकथंनामैषांदुःखनिवृत्तिःस्यादितिकृपामेवभावयेन्नोपेक्षांनवाहर्षम्।२।पुण्य
वत्सुपुण्यानुमोदनेनहर्षंकुर्यान्नतुविद्वेषंनचोपेक्षाम्।३।अपुण्यवत्स्वौदासीन्यमेव।
भावयेन्नानुमोदनंनवाद्वेषम्।४॥एवमस्यभावयतःशुक्लोधर्मउपजायते॥ततश्चविग
तरागद्वेषादिमलंचित्तंप्रसन्नंसदेकाग्रतायोग्यंभवतिमैत्र्यादिचतुष्टयंचोपलक्षणम्

सुखेनब्रह्मसंस्पर्शमत्यन्तंसुखमश्नुते २८

भयंसत्त्वसंशुद्धिरित्यादीनाममानित्वमदंभित्वमित्यादीनांचधर्माणांसर्वेषामेतेषांसंभवास
नारूपत्वेनमलिनवासनानिवर्तकत्वात्रागद्वेषौमहाशत्रूसर्वपुरुषार्थप्रतिबंधकौमह।
ताप्रयत्नेनपरिहर्तव्यावित्येतदत्रार्थः एवमन्येपिप्राणायामादयउपायाश्चित्तप्रसादना
यदर्शिताः तदेतच्चित्तप्रसादनंभगवदनुग्रहेणयस्यजातंतंप्रत्येवैतद्वचनंसुखेनेतिश्र
मयामनःप्रशमानुपपत्तेः ॥२८॥ ॥ श्रीराम ॥ ॥ ॥ कृष्ण ॥ ॥ ॥ ॥ शिवायनमः ॥ ॥

तदेवं निरोधसमाधिना त्वंपदलक्ष्ये तत्पदलक्ष्यैक्येन शुद्धे साक्षात्कृते तदेकगोचरा तत्त्वमसीति वेदान्तवा
क्यजन्या निर्विकल्पकसाक्षात्काररूपाहं ब्रह्मास्मीति विद्याभिधाना जायते ॥ ततश्च कृत्स्नाविद्यातत्कार्य
निवृत्त्या ब्रह्मसुखमत्यन्तमश्नुत इत्युपपादयति त्रिभिः श्लोकैः ॥ तत्र प्रथमं त्वंपदलक्ष्योपस्थितिमा
ह ॥ सर्वभूतस्थमिति ॥ सर्वभूतेषु स्थावरजंगमेषु शरीरेषु भोक्तृतया स्थितमेकमेव नित्यं विभुमा
त्मानं प्रत्यक्चेतनं साक्षिणं परमार्थसत्यमानंदघनं साक्ष्येभ्योनृतजडपरिच्छिन्नदुःखरूपेभ्यो विवे श्लो
केनेक्षते साक्षात्करोति ॥ तस्मिंश्चात्मनि साक्षिणि सर्वाणि भूतानि साक्षिणाध्यासिकेन संबंधे
न भोग्यतया कल्पितानि साक्षिसाक्ष्ययोः संबंधान्तरानुपपत्तेर्मिथ्याभूतानि परिच्छिन्नानि जडानि दुः
खात्मकानि साक्षिणो विवेकेनेक्षते कः योगयुक्तात्मा योगेन निर्विचारवैशारद्यरूपेण युक्तः प्र

॥ सर्वभूतस्थमात्मानं । सर्वभूतानि चात्मनि ॥

सादं प्राप्तः आत्मांतःकरणं यस्य स तथा तथा च प्रागेवोक्तं निर्विचारवैशारद्येध्यात्मप्रसादः ऋ
तंभरा तत्र प्रज्ञा ॥ श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वादिति ॥ तथा च शास्त्रानुमानागो
चरयथार्थवस्तुविशेषगोचरयोगजप्रत्यक्षेण ऋतंभरसंज्ञेन युगपत्सूक्ष्मव्यवहितविप्रकृष्ट
वस्तुवत् सर्वं त्वल्पमेव पश्यतीति सर्वत्र समं दर्शनं यस्येति सर्वत्र समदर्शनः स्वात्मानमनात्मानं च योग
युक्तात्मा यथावस्थितमीक्षत इति युक्तं ॥ अथवा यो योगयुक्तात्मा यो वा सर्वत्र समदर्शनः स आ
त्मानमीक्षत इति योगिसमदर्शिनावात्मेक्षणाधिकारिणावुक्तौ ॥ यथा हि चित्तवृत्तिनिरोधः साक्षि

साक्षात्कारहेतुः तथाज्ञउ विवेकेन सर्वान्स्मृते चैतन्यपृथक्करणमपि मायासर्वं योगश्चापेक्षितः अ
गी॰टी॰ न एवाहूर्वसिष्टः ॥ द्वौक्रमौ चित्तनाशस्य योगो ज्ञानं च राघव ॥ योगो हि वृत्तिनिरोधो हि ज्ञानं सम्यग
म॰ष वेक्षणम् ॥ असाध्यः कस्यचिद्योगः कस्यचित्तत्वनिश्चयः ॥ प्रकारौ द्वौ ततो देवो जगाद परमः शिव
२३ इति ॥ चित्तनाशस्य साक्षित्वेन ॥ सकाशात्तु उपाधिभूतचित्तस्य पृथक्करणात्तद्दर्शनस्य तस्य चाप
यद्वयं ॥ एको योगोऽसंप्रज्ञातसमाधिः ॥ संप्रज्ञातसमाधौ हि आत्मैकाकारवृत्तिप्रवाहयुक्तमन्तः
करणसत्वं साक्षित्वेनानुभूयते ॥ निरुद्धसर्ववृत्तिकं तद्रूपं शान्तत्वान्नानुभूयत इति विशेषः द्विती
यस्तु साक्षिणा कल्पितं साक्ष्यमनृतत्वान्नास्त्येव ॥ साक्ष्येव तु परमार्थसत्यः केवलो विद्यत इति वि

॥ ईक्षते योगयुक्तात्मा । सर्वत्र समदर्शनः । २९ ॥

चारः तत्र प्रथमतनुपायं प्रपंचपरमार्थतावादिनो हैरण्यगर्भादयः प्रपेदिरे ॥ तेषां परमार्थस्य चि
त्तस्यादर्शनेन साक्षिदर्शनेन निरोधातिरिक्तोपायासंभवात् ॥ श्रीमच्छंकरभगवत्पूज्यपादमतोप
जीविनस्तूपनिषदः प्रपंचानृततत्ववादिनो द्वितीयमेवोपायमनुपेयुः ॥ तेषां ह्यधिष्ठानज्ञानदार्ढ्ये
सति तत्र कल्पितस्य बाधितस्य चित्तस्य तद्रूपस्य चादर्शनमनायासेनैवोपपद्यते ॥ अत एव भग
वत्पूज्यपादाः ऊचुरपि ब्रह्मविदो योगापेक्षां न कुत्राप्ययोवभंजुः ॥ अत एव चोपनिषदः परमहं
साः श्रोतैर्वेदान्तवाक्यविचार एव गुरुमुपसृत्य प्रवर्तन्ते ब्रह्मसाक्षात्कारायन तु योगाभिविचारे यो
वचित्तदोषनिराकरणेन तस्यान्यथासिद्धत्वादिति कृतमधिकेन ॥ २९ ॥ ॥ श्रीरामचंद्रजीसहा

चित्तनाशस्य=

एवं शुद्धं त्वंपदार्थं निरूप्य शुद्धं तत्पदार्थं निरूपयति यो मामिति ॥ यो योगी मामीश्वरं तत्पदार्थं सर्वोपा-
प्रपंचकारणमायोपाधिकमनुपाधि विवेकेन सर्वत्र प्रपंचे सद्रूपेणानुस्यूतरूपेण चानुस्यूतं सर्वो-
पाधिविनिर्मुक्तं परमार्थसत्यमानंदघनमनंतं पश्यति ॥ योगजेन प्रत्यक्षेणापरोक्षीकरोति ॥ तथा सर्वं
च प्रपंचजातं मायया मय्यारोपितं मद्भिन्नतया मत्स्वरूपत्वेनैव पश्यति ॥ तस्यैवं विवेकदर्शिनोऽहं तत्पदार्थो भगवान्न प्र- वे
णश्यामि ईश्वरः कस्मिन्मद्भिन्नो नास्तीति परोक्षज्ञानविषयो न भवामि ॥ किं तु योगजापरोक्षज्ञानविषयो भवा-
मि ॥ यद्यपि वाक्यजापरोक्षज्ञानविषयत्वं त्वंपदार्थाभेदे नैव ॥ तथापि केवलस्यापि तत्पदार्थस्य योगजाप-

यो मां पश्यति सर्वत्र । सर्वं च मयि पश्यति ॥ तस्याहं न प्रणश्यामि । स च मे न प्रणश्यति । ३० ॥

रोक्षज्ञानविषयत्वमुपपद्यत एव ॥ एवं योगजेनापरोक्षीकुर्वन् स च मे न प्रणश्यति ॥ परोक्षो न भवति
स्वात्मा हि मम सद्विज्ञानतिप्रियत्वात् ॥ सर्वदा मदपरोक्षज्ञानगोचरो भवति । ये यथा मां प्रपद्यंते तांस्तथैव
भजाम्यहमित्युक्तेः तथैव शरशय्यास्थभीष्मध्यानस्य युधिष्ठिरं प्रति भगवतोक्तेः अविद्वांस्तु स्वात्मानम-
पि संतं भगवंतं न पश्यति अतो भगवानपश्यन्नपि तं न पश्यति स एनमविदितो न भुनक्तीति श्रुतेः विद्वांस्तु
सदैव सन्निहितो भगवतोऽनुग्रहभाजनमित्यर्थः ३० ॥ ॥ ॥ श्रीराम ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
यो ह वा अस्माल्लोकात्स्वं लोकमदृष्ट्वा प्रैति स एनमविदितो न भुनक्तीति यो ह वै यः कश्चित्स्वं लोकं परमात्मानमहम-
हं ब्रह्मास्मीत्यदृष्ट्वा अविदित्वा अस्माल्लोकात्सांसारिकदिग्रहस्थलदारात्मैति म्रियते तमेनं स्वं लोकः परमात्मा अ-
विदितः अविद्यया व्यवहितः सन् शोकमोहादिदोषापनयेन न भुनक्ति न पालयति =२

धि

गी॰टी॰ मा॰ष॰ २८

एवं त्वंपदार्थं तत्पदार्थं च शुद्धं निरूप्य तत्त्वमसीति वाक्यार्थं निरूपयति ॥ सर्वेषु भूतेष्वधिष्ठानतया स्थितं सर्वानु
स्यूतं सन्मात्रं मां शुद्धं तत्पदलक्ष्यं स्वेन त्वंपदलक्ष्येणात्मना सहैकत्वमत्यंताभेदमास्थितः ॥ यथा काशो महाकाश
इत्यत्रैवोपाधिभेदनिराकरणेनैकत्वं यो भजति ॥ अहं ब्रह्मास्मीति वेदांतवाक्यजेन साक्षात्कारेणापरो
क्षीकरोति ॥ सोऽविद्यातत्कार्यनिवृत्त्या जीवन्मुक्तः कृतकृत्य एव भवति ॥ यावत्तु तस्य बाधितानुवृत्त्या शरी
रादिदर्शनमनुवर्तते ॥ तावत्प्रारब्धकर्मप्राबल्यात् सर्वकर्मत्यागेन वा याज्ञवल्क्यादिवत् विहितेन कर्म

25

सर्वभूतस्थितं यो मां ॥ भजत्येकत्वमास्थितः ॥ सर्वथा वर्तमानोऽपि ॥ स योगी मयि वर्तते ॥ ३१ ॥

णा वा जनकादिवत् ॥ प्रतिषिद्धेन कर्मणा वा दत्तात्रेयादिवत् ॥ सर्वथा येन केनापि रूपेण वर्तमानोऽपि
व्यवहरन्नपि स योगी ब्रह्माहमस्मीति विद्वान्मय्येव परमात्मन्येवाभेदेन वर्तते ॥ सर्वथा तस्य मोक्षं प्रति
नास्ति प्रतिबंधशंका ॥ तस्य ह न देवाश्च नाभूत्या ईशत आत्मा ह्येषां स भवतीति श्रुतिः ॥ देवा महाप्र
भावा अपि तस्य मोक्षाभवनाय नेशते किमुतान्ये क्षुद्रा इत्यर्थः ॥ ब्रह्मविदो निषिद्धकर्मणि प्रवर्त
कयो रागद्वेषयोरसंभवेन निषिद्धकर्मासंभवेऽपि तद्गीकृत्य ज्ञानस्तुत्यर्थमिदमुक्तं सर्वथा वर्त
मानोऽपीति ॥ हत्वापि स इमांल्लोकान्न हंति न निबध्यत इतिवत् ॥ ३१ ॥ श्रीरामचंद्रजी सहाय ॥ १

२८

एवमन्तर्मनेऽपि तत्त्वबोधे कस्मिंश्चिन्मनोनाशवासनाक्षययोरभावाज्जीवन्मुक्तिसुखं नानुभवति चित्तविक्षेपेणाचरत्सु
दुःखमननुभवति सोऽपि परमो योगी देहपाते कैवल्यभागित्वात् ॥ देहस्तद्भावपर्यन्तं चरत्स्वदुःखानुभवात् । तत्त्व
ज्ञानमनोनाशवासनाक्षयाणां तु युगपदभ्यासात् दृष्टदुःखनिवृत्तिपूर्वकं जीवन्मुक्तिसुखमनुभवत्यार।
ब्धकर्मवशात्समाधेर्व्युत्थानकाले ॥ आत्मैवोपमा स्वोपमा तेन नात्मदृष्टान्तेन सर्वत्र प्राणिजाते सुखं वा यदि।
त वा दुःखं समं पश्यति यः पश्यति तस्यानिष्टं यथा न संपादयति एवं परस्याप्यनिष्टं यो न संपादयति अद्वेषशून्य
त्वात् एवं स्वस्येष्टं यथा संपादयति तथा परस्यापीष्टं यः संपादयति रागशून्यत्वात् स निर्वासनतया उपशान्त द्वेष
मनाः योगी ब्रह्मवित् परमः श्रेष्ठो मतः पूर्वस्मात्तु हे अर्जुन ॥ अतस्तत्त्वज्ञानमनोनाशवासनाक्षयाणा
मेकसमभ्यासाय महान्प्रयत्नः आस्थेयः इत्यर्थः ॥ तत्रैवं सर्वद्वैतजातं मिथ्येति धीये चिदानन्दात्मनि मायया क
ल्पितत्वात्स्वप्नेष्विव ॥ आत्मैवैकः परमार्थसत्यः सच्चिदानन्दाद्वयोऽहमस्मीति ज्ञानं तत्त्वज्ञानम् ॥ १ ॥ प्रदीपज्वा
लासंतानवद्वृत्तिसंतानरूपेण परिणममानमन्तःकरणद्रव्यं मननात्मकत्वान्मन इत्युच्यते ॥ तस्य ना।
शो नाम वृत्तिरूपपरिणाममपरित्यज्य सर्ववृत्तिविरोधिना निरोधाकारेण परिणामः ॥ २ ॥ पूर्वापरप।
पर्यामर्शमन्तरेण सहसोत्पद्यमानस्य क्रोधादिवृत्तिविशेषस्य हेतुश्चित्तगतः संस्कारविशेषो वासना।
पूर्वाभ्यासेन चित्ते वासनात्वात् तस्याः क्षयो नाम विवेकजन्यायां चित्तप्रशमवासनायां दृढायां सत्य
पि बाह्यनिमित्ते क्रोधाद्यनुत्पत्तिः ॥ ३ ॥ तत्र तत्त्वज्ञाने सति मिथ्याभूते जगति नरविषाणादाविव धीह
त्यक्तदयादात्मनश्च दृष्टत्वेन पुनर्हेयत्वनुपयोगान्निर्विषयता ॥ ॥ ॐ नमो भगवते वासुदेवाय ॥ ॥ ॥ ॥

गी॰टी॰
म॰ष॰
२५

ग्निवन्मनो नश्यति ॥ नष्टे च मनसि संस्कारोद्बोधकस्य वाह्यस्य निमित्तस्याप्रतीतेर्वासना क्षीयते एवं क्षीणायां
वासनायां हेत्वभावेन क्रोधादिवृत्त्यनुदयान्मनो नश्यति ॥ नष्टे च मनसि शमदमादिसंपत्त्या तत्त्वज्ञानमुदेति
एवमुत्पन्ने तत्त्वज्ञाने रागद्वेषादिरूपा वासना क्षीयते ॥ क्षीणायां च वासनायां प्रतिबंधाभावात्तत्त्वज्ञानोद
य इति परस्परकारणत्वं दर्शनीयम् ॥ अत एव भगवान्वसिष्ठ आह ॥ तत्त्वज्ञानं मनोनाशो वासनाक्ष
य एव च ॥ मिथः कारणतां गत्वा दुःसाध्यानि स्थितानि हि ॥ तस्माद्राघव यत्नेन पौरुषेण विवेकिना ।
भोगेच्छां दूरतस्त्यक्त्वा त्रयमेतत्समाश्रय ॥ पौरुषो यत्नः येन केनाप्युपायेनावश्यं संपादयिष्यामीत्ये
वंविधोत्साहरूपो निर्बंधः विवेको नाम विविच्य निश्चयः तत्त्वज्ञानस्य श्रवणादिकं साधनं मनोनाश
स्य योगः वासनाक्षयस्य प्रतिकूलवासनोत्पादनमिति ॥ एतादृशविवेकयुक्तेन पौरुषेण प्रयत्नेन भो
गेच्छायाः स्वल्पाया अपि हि विषाक्तस्मवर्त्मेवेति न्यायेन वासनावृद्धिहेतुत्वाद्दूरतस्त्रयमुक्तं द्विविधो ।
हि विद्याधिकारी कृतोपास्तिरकृतोपास्तिश्च ॥ तत्र यदुपास्यसाक्षात्कारपर्यंतामुपास्तिं कृत्वा तत्त्व ।
ज्ञानाय प्रवृत्तस्तस्य वासनाक्षयमनोनाशयोर्दृढतरत्वेन ज्ञानादूर्ध्वं जीवन्मुक्तिः स्वत एव सिद्ध्यति ।
इदानीतनस्तु प्रायेणाकृतोपास्तिरेव मुमुक्षुरौत्सुक्यमात्रात्सहसा विद्यायां प्रवर्तते ॥ योगं विना
चित्तु विवेकमात्रेणैव च मनोनाशवासनाक्षयौ तात्कालिकौ संपाद्य शमदमादिसंपत्त्या श्रवणम
ननिदिध्यासनानि संपादयति ॥ तैस्तु दृढाभ्यस्तैः सर्ववेदविच्छेदि तत्त्वज्ञानमुदेति अविद्याग्रं
थिः अत्र स्वत्वं हृदयग्रंथिः संशयाः कर्माणि सर्वकामत्वं मृत्युः पुनर्जन्म चेत्यनेक ॥ ॥ राम ॥

२५

विद्येवं योऽत्रात्मानान्निवर्तते ॥ तथा च श्रूयते ॥ एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य । ब्रह्म
वेद ब्रह्मैव भवति ॥ भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ॥ क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे
सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान्कामान्सह ॥ तमेव विदित्वातिमृ
त्युमेति ॥ यस्त्वविज्ञानवान्भवत्यमनस्कः सदाशुचिः ॥ न स तत्पदमाप्नोति यस्माद्भूयो न जायते ॥ य एवं वेदाऽहं
ब्रह्मास्मीति स इदं सर्वं भवतीत्यसर्वत्वनिवृत्तिफलमदाहार्थ्यम् अस्यं विदेहमुक्तिः सत्यपि देहे ज्ञानोत्पत्तिस
मकालीनाज्ञेया ॥ ब्रह्मणाप विद्याख्यारोपितानामेतेषां वेधानामविद्यानाशे सति निवृत्तौ पुनरुत्पत्त्यसंभवा
त् ॥ अतः शैथिल्यं देहत्वभावान्नत्वज्ञानं तस्मान्निवर्तते ॥ मनोनाशवासनाक्षययोस्तु दृढाभ्यासाभावादङ्ग
प्रदेन प्रारब्धेन कर्मणा वाध्यमानत्वाच्च सवात प्रदेश प्रदीपवत्सहसा निवर्तते ॥ अत इदानींतनस्य तत्त्व
ज्ञानिनः प्राक्सिद्धेन तत्त्वज्ञानेन प्रयत्नापेक्षा ॥ किं तु मनोनाशवासनाक्षययोः प्रयत्नसाध्याविति ॥ तत्र म
नोनाशो संप्रज्ञातसमाधिनिरूपणे न निरूपितः ॥ प्राक् ॥ वासनाक्षयस्त्विदानीं निरूप्यते ॥ तत्र वासना स्व
रूपं वसिष्ठ आह ॥ दृढभावनया त्यक्तपूर्वापरविचारणम् ॥ यदादानं पदार्थस्य वासना सा प्रकीर्तिता ॥ अ
स्व अत्र च स्वदेशाचारकुलधर्मस्वभावभेदतद्गतापशब्दसुशब्दादिषु प्राणिनामभिनिवेशः सामान्येनोदा
हरणं ॥ सा च द्विविधा मलिना शुद्धा च ॥ शुद्धा दैवीसंपत् शास्त्रसंस्कारप्राबल्यात् ॥ तत्त्वज्ञानसाधनत्वेनैत
कल्पेव ॥ मलिना त्रिविधा लोकवासना शास्त्रवासना देहवासना चेति ॥ सर्वे जना यथा निंदंति तथैवाच

वेषो लोकवासना ॥ तस्याश्च को लोकमाराधयितुं समर्थ इति न्यायेन संपादयितुमशक्यत्वात् पुरुषार्थानुपयो-
गी॰टी॰ गित्वाच्च मलिनत्वम् ॥ २ ॥ शास्त्रवासनातु त्रिविधा ॥ पाठव्यसनं बहुशास्त्रव्यसनं अनुष्ठानव्यसनं चेति क्र-
मष॰ मेण भारद्वाजस्य दुर्वाससो निदाघस्य च प्रसिद्धा मलिनत्वं चास्याः क्लेशावहत्वात् पुरुषार्थानुपयोगि-
२६ त्वाद्दर्पहेतुत्वाज्जन्महेतुत्वाच्च ॥ २ ॥ देहवासनातु त्रिविधा ॥ अनात्मन्यात्मत्वभ्रांतिः ॥ गुणाधानभ्रांतिः ॥
दोषापनयनभ्रांतिश्चेति ॥ तत्रात्मत्वभ्रांतिर्विरोचनादिषु प्रसिद्धा सार्वलौकिकी ॥ गुणाधानं द्विविधं लौ-
26 किकं शास्त्रीयं च ॥ समीचीनशब्दादिविषयसंपादनं लौकिकम् ॥ गंगास्नानशालग्रामतीर्थादिसंपाद- पूजनं
नं शास्त्रीयम् दोषापनयनमपि द्विविधं लौकिकं शास्त्रीयं च ॥ चिकित्सकोक्तैरौषधैर्व्याध्याद्यपनयनं लौ-
किकम् ॥ वैदिकस्नानाचमनादिभिरशौचाद्यपनयनं वैदिकं ॥ ३ ॥ एतस्याश्च सर्वप्रकारायाश्च मलिनत-
मप्रामाणिकत्वात् ॥ अशक्यत्वात् पुरुषार्थानुपयोगित्वात् पुनर्जन्महेतुत्वाच्च शास्त्रे प्रसिद्धं ॥ तदेत-
ल्लोकशास्त्रदेहवासनात्रयमविवेकिनामुपादेयत्वेन प्रतिभासमानमपि विविदिषोर्वेदनोत्पत्तिविरो-
धित्वाद्विदुषो ज्ञाननिष्ठाविरोधित्वाच्च विवेकिभिर्हेयम् ॥ तदेवं बाह्यविषयवासना त्रिविधा निरूपि-
ता ॥ आभ्यंतरवासनातु कामक्रोधदंभदर्पाद्यासुरसंपद्रूपा सर्वानर्थमूला मानसी वासनेत्युच्यते ॥
तदेवं बाह्याभ्यंतरवासनाचतुष्टयस्य शुद्धवासनया त्यागः संपादनीयः ॥ तदुक्तं वसिष्ठेन ॥ मानसी-
र्वासनाः पूर्वं त्यक्त्वा विषयवासनाः ॥ मैत्र्यादिवासनानाम गृहाणामलवासना इति ॥ तत्र विषयवास-
नाशब्देन पूर्वोक्तास्तिस्रो लोकशास्त्रदेहवासनाः ॥ ॥ ॐ नमो भगवते वासुदेवाय ॥ ॥ शुभमस्तु ॥ ॥

विवर्द्धिताः ॥ मानसत्वास्तनाशब्देन कामक्रोधदर्पदंभा यावान्त्रसंपद्विवर्द्धिता ॥ यद्वा शब्दस्पर्शरूपरसगंधा वि
षयाः तेषां भुज्यमानत्वदशाजन्यः संस्कारो विषयवासना ॥ काम्यमानत्वदशाजन्यः संस्कारो मानसवास
ना ॥ अस्मिन्पक्षे पूर्वोक्तानां च तृष्णामनयोरेवांतर्भावः वाह्याभ्यंतरव्यतिरेकेणावासनांतरासंभवात् ना
संवासनानां परित्यागो नाम तद्धेतुद्वेष्यादिवासनोत्पादनमस्तासु मैत्र्यादिवासनाभावना पतंजलि
नाप्युक्ताः प्राक्संक्षेपेण व्याख्याता अपि पुनर्व्याख्यायंते ॥ चित्तं हि रागद्वेषपुण्यपापैः कलुषी क्रिय
ते ॥ तत्र सुखानुशायी रागः मोहादस्य यमानं सुखमनुशेते कश्चिद्दीदृक्निर्विशेषो रागः सः सर्वं सुख
जातीयं मे भूयादिति तच्च दृष्टादृष्टसामग्र्यभावात्संपादयितुमशक्यम् ॥ अतः स रागश्चित्तं कलुषीकरो
ति ॥ यदा तु सुखिषु प्राणिषु मैत्रीं भावयेत् ॥ सर्वे ह्येते सुखिनो मदीया इति तदा तत्सुखं स्वकीयमेव सं
पन्नमिति भावयतस्तत्र रागो निवर्तते ॥ यथा स्वस्य राज्ये निवृत्ते वा पितृभ्रात्रादिराज्यमेव स्वकीयं राज्यं तद्व
त् ॥ निवृत्ते च रागे वर्षाव्यपाये जलमिव चित्तं प्रसीदति ॥ तथा दुःखानुशायी द्वेषः दुःखमनुशेते क
श्चिद्दीदृक् निर्विशेषस्तमोऽनुगतरजःपरिणामरूपः दुःखं सर्वदा मे मा भूदिति तच्च शत्रुव्याघ्रादिषु स
त्सु निवारयितुमशक्यम् ॥ न च सर्वे ते दुःखहेतवो हंतुं शक्यंते ॥ अतः स द्वेषः सदा हृदयं दहति ॥ यदा
तु स्वस्यैव परेषां सर्वेषामपि दुःखं मा भूदिति करुणां दुःखिषु भावयेत् तदा वैर्यादिद्वेषनिवृत्तौ चित्तं प्र
सीदति ॥ तथा च स्मर्यते ॥ प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा । आत्मौपम्येन भूतेषु दयां कुर्वंति सा

एतदेवेहाप्युक्तमात्मौपम्येनेत्यादि तथा प्राणिनः स्वभावत एव पुण्यं नानुतिष्ठंति पापं त्वनुतिष्ठंति ॥ तदाहुः
पुण्यस्य फलमिच्छंति पुण्यं नेच्छंति मानवाः ॥ न पापफलमिच्छंति पापं कुर्वंति यत्नत इति ॥ ते च पुण्यपापे
क्रियमाणे क्रियमाणे पश्चात्तापं जनयतः स च श्रुत्यानूदितः ॥ किमहं साधु नाकरवं किमहं पापमकर
वमिति ॥ यद्यसौ पुण्यपुरुषेषु मुदितां भावयेत्तदा तद्वासनावान्स्वयमेवाप्रमत्तोऽशुक्लाकृष्णे पुण्ये प्रव
र्तते ॥ तदुक्तम् ॥ कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम् ॥ अयोगिनां त्रिविधं शुक्लं शुभं कृष्णमशुभं

॥ आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ॥

शु क्लकृष्णं शुभाशुभं चेति ॥ तथा पापपुरुषेषूपेक्षां भावयन्स्वयमपि तद्वासनावान्पापान्निवर्तते ॥ ततश्च पु
ण्याकरणपापकरणनिमित्तस्य पश्चात्तापस्याभावे चित्तं प्रसीदति ॥ एवं सत्त्वसुखिषु मैत्रीं भावयतो न केवलं
रागो निवर्तते ॥ किं त्वसूयेर्ष्यादयोऽपि निवर्तंते ॥ परगुणेषु दोषाविष्करणमसूया ॥ परगुणानामसहन
मीर्ष्या । यदा मैत्रीवशात्परस्य स्वकीयमेव संपन्नं तदा परगुणेषु कथमसूयादिकं संभवेत् ॥ तथा दुःखि
षु करुणां भावयतः ॥ शत्रुवधादिकरो द्वेषो यदा निवर्तते तदा दुःखप्रतियोगिकस्य सुखित्वप्रयुक्तेर्ष्या

पिनिवर्तते ॥ एवंदोषांतरनिवृत्तिस्पृहणीया वासिष्ठरामायणादिषु ॥ तदेवं तत्त्वज्ञानं मनोनाशो वासनाक्षय
येन श्चेति त्रयमभ्यसनीयम् तत्र केनापि द्वारेण पुनः पुनः तत्त्वानुस्मरणं तत्त्वज्ञानाभ्यासः ॥ तदुक्तं । तच्चिंतनं त
त्कथनमन्योन्यं तत्प्रबोधनम् ॥ एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः ॥ सर्गादावेव नोत्पन्नं दृश्यं नास्त्ये
व तत्सदा ॥ इदं जगदहं चेति बोधाभ्यासं विदुः परम् ॥ इति दृश्यावभासविरोधी योगाभ्यासो मनोनिरोधा
भ्यासः । तदुक्तं ॥ अत्यंताभावसंपत्तौ ज्ञातृज्ञेयस्य वस्तुनः ॥ युक्त्या शास्त्रैर्यतंते ये ते प्यत्राभ्यासिनः स्थि

सुखं वा यदि वा दुःखं ॥ स योगी परमो मतः ॥ ३२ ॥

ता इति ॥ ज्ञातृज्ञेययोर्मिथ्यात्वधीरभावसंपत्तिः स्वप्नेपरागाप्यप्रतीतिरत्यंताभावसंपत्तिः तदर्थं युक्त्या यो
गेन ॥ दृश्यासंभवबोधेन रागद्वेषादितानवे ॥ रतिर्बलोदिता यासौ ब्रह्माभ्यासः स उच्यते इति ॥ रागद्वे
षादिक्षीणतारूपवासनाक्षयाभ्यास उक्तः तस्मादुपपन्नमेतत् तत्त्वज्ञानाभ्यासेन मनोनाशाभ्यासेन वा
सनाक्षयाभ्यासेन च रागद्वेषशून्यतया यः स्वपरसुखदुःखादिषु समदृष्टिः स परमो योगी मतः य
स्तु विषमदृष्टिः स तत्त्वज्ञानवानप्यपरमो योगीति ॥ ५ श्रीराम ॥ ५ श्लोकाः ॥ ३२ ॥ ॥ ॥ ॥ ॥ ॥ ॥

गी॰टी॰ उक्तमर्थमाक्षिपन्॥ योयंसर्वत्रसमदृष्टिलक्षणः परमोयोगःसाम्येनसमत्वेनचित्तगतानांरागद्वेषादीनांविषम
दृष्टिहेतूनांनिराकरणेनत्वयासर्वज्ञेनेश्वरेणोक्तः हेमधुसूदनसर्ववैदिकसंप्रदायप्रवर्तक॥ एतस्यत्वदुक्त
मधु॰ स्यसर्वमनोवृत्तिनिरोधलक्षणस्ययोगस्यस्थितिंविद्यमानतांस्थिरांदीर्घकालानुवर्तिनींनपश्यामिनसंभाव
२८ यामिअहमस्मदादिर्योन्योवायोगाभ्यासनिपुणः कस्मान्नसंभावयसि॥ तत्राह॥ चंचलत्वान्मनसइतिशेषः ३३

28

अर्जुनउवाच॥

योयंयोगस्त्वयाप्रोक्तः। साम्येनमधुसूदन॥ एतस्याहंनपश्यामि। चंचलत्वात्स्थितिंस्थिरां।३३॥

सर्वलोकप्रसिद्धत्वेनतदेवचंचलत्वमुपपादयति॥ चंचलमत्यर्थंचलंसदाचलनस्वभावंमनःक्षिप्रसिद्ध
मेवैतत्॥ भक्तानांपापादिदोषान्सर्वथानिवारयितुमशक्यानपिकृषतिनिवारयति॥ तेषामेवसर्वथा
प्राप्तुमशक्यानपिपुरुषार्थान्नाकर्षतिप्रापयतीतिवाकृष्णः तेनरूपेणसंबोधयन्नदुर्निवारमपिचित्त
चांचल्यंनिवार्यदुष्प्रापमपिसमाधिसुखंत्वमेवप्रापयितुंशक्तोसी॥॥ श्रीराम॥ ॥ ॥ ॥ ॥

तिसूचयति ॥ नकेवलमत्यर्थं चलं किंतु प्रमाथि शरीरमिंद्रियाणि च प्रमथितं क्षोभयितृशीलं यस्य तत्तत्क्षो
भकतया शरीरेंद्रियसंघातस्य विवशताहेतुरित्यर्थः ॥ किंच बलवत् ॥ अभिप्रेताद्विषयात्केनाप्युपाये
ननिवारयितुमशक्यम् ॥ किंच दृढं विषयवासनासहस्रस्यूततयाभेत्तुमशक्यम् ॥ तंतुनागवदच्छे। दे रो
द्यमिति भाष्यं ॥ तंतुनागो नाम पाशः तांतनीति गुर्जरदेशे प्रसिद्धः ॥ महाह्रदनिवासी जंतुविशेषो वा।
तस्यातिदृढतया बलवतो बलवत्तया प्रमाथिनः प्रमाथितयातिचंचलस्य महामत्तवनगजस्येव।

॥ चंचलं हि मनः कृष्ण । प्रमाथि बलवद्दृढं ॥

मनसो निग्रहं निरोधं निर्वृत्तिकतयावस्थानं सुदुष्करं सर्वथा कर्तुमशक्यमहं मन्ये ॥ वायोरिव यथा
काशे दोधूयमानस्य वायोर्निश्चलत्वं संपाद्य निरोधनमशक्यं तद्वदित्यर्थः ॥ अयं भावः ॥ जातेपित
त्वज्ञाने प्रारब्धकर्मभोगाय जीवतः पुरुषस्य कर्तृत्वभोक्तृत्वसुखदुःखरागद्वेषादिलक्षणाश्चित्त
धर्माः क्लेशप्रदहेतुत्वाद्बाधितानुवृत्त ॥॥॥ श्रीरामजी ॥॥॥ कृष्णः॥ शिवायनमः॥॥॥ शुभमस्तु॥

गी.टी. त्यापिवंयोभवति॥ चित्तवृत्तिनिरोधरूपेणतुयोगेनतस्यनिवारणंजीवन्मुक्तिरित्युच्यते॥ तस्याःसंपादनेनत
म.ष. योगीपरमोमतइत्युक्तमतत्रेदमुच्यते॥ बंधःकिंसाक्षिगतोनिवार्यतेकिंवाचित्तगतोनाद्यः॥ तत्त्वज्ञानेनैवसा
२९ क्षिगतोबंधस्यनिवारितत्वात्॥ नद्वितीयंस्वभावविपर्ययायोगात्॥ विरोधिसद्भावाच्च॥ नहिजलादार्द्रत्वम
ग्नेर्वौष्ण्यंतन्निवारयितुंशक्यते॥ प्रतिक्षणपरिणामिनोहिभावाऋतेचितिशक्तेरितिन्यायेनप्रतिक्षणप
रिणामस्वभावत्वाच्चित्तस्यप्रारब्धभोगेनचकर्मणाकृत्स्नाविघातकाधिनाशनेप्रवृत्तस्यतत्त्वज्ञानस्यापि

॥तस्याहंनिग्रहंमन्ये॥वायोरिवसुदुःकरं॥३४॥

29

प्रतिबंधंकृत्वास्वफलदानायदेहेन्द्रियादिकमवस्थापितमतश्चकर्मणास्वफलसुखदुःखादिभोगश्चि
त्तवृत्तिभिर्विनासंपादयितुंशक्यतेतस्माद्यद्यपिस्वाभाविकानामपिचित्तपरिणामानांकदाचिद्योगे
नाभिभवःशक्यतेकर्तुंतथापितत्त्वज्ञानादिवयोगादपिप्रारब्धफलस्यकर्मणःप्राबल्यादवश्यंभावि
तिचित्तस्यचांचल्येयोगेनतन्निवारणमशक्यमहंस्वबोधादेवमन्ये॥ तस्मादनुपपन्नमेतदात्मौपम्ये
नसर्वत्रसमदर्शीपरमोयोगीमतइत्युक्तंतस्याक्षेपः॥३४॥ ॥श्रीराम॥ ॥कृष्ण॥ ॥ ॥ ॥ २९

असंशयं महाबाहो मनो दुर्निग्रहं चलं ॥ अभ्यासेन तु कौंतेय वैराग्येण च गृह्यते ३५॥ ॥

तमिममाक्षेपं परिहरन् ॥ सम्यग्विदितं ते चित्तचेष्टितं मनो निग्रहीतुं शक्यसीति ततो मेना संबोधयन्निव हे म
हाबाहो इति ॥ महांतो साक्षान्महादेवेनापि सह कृतग्रहरणो बाहू यस्येति निरतिशयं सत्कर्षं सूचयति
प्राग्भुक्तकर्मप्राबल्यादसंयतात्मना दुर्निग्रहं दुःखेनापि निग्रहीतुमशक्यं प्रमाथि बलवद्दृढमिति विशेष
णात्रयं पिंडीकृत्योक्तम् ॥ चलं स्वभावचंचलं मन इत्यसंशयं नास्त्येव संशयो अत्रास्मत्पमेवैतद्ब्रवीषीत्य
र्थः ॥ एवं सत्यपि संयतात्मनाः तिमात्रोपायेन योगेनाभ्यासेन वैराग्येण च गृह्यते सर्ववृत्तिशून्यं क्रियत
इत्यर्थः ॥ अनिगृहीतस्य संयतात्मनः सकाशात् संयतात्मनो निगृहीतृविशेषद्योतनाय तु शब्दः ॥ मनोनि
ग्रहे अभ्यासवैराग्ययोः समुच्चयबोधनाय चशब्दः ॥ हे कौंतेयेति ॥ पितृस्वसृपुत्रत्वमवश्यं मया स्वीकार्यत
व्य इति स्नेहसंबंधं सूचितेनाश्वासयति ॥ अत्र प्रथमार्धेन चित्तस्य हठनिग्रहो न संभवतीति द्वितीयार्धेन त देतो
क्रमनिग्रहः संभवतीत्युक्तम् द्विविधो हि मनोनिग्रहः हठेन क्रमेण च ॥ तत्र चक्षुः श्रोत्रादीनि ज्ञानेंद्रि
गपा याणि वाक्पाण्यादीनि कर्मेंद्रियाणि च तत्तद्गोलकमात्रोपरोधेन हठान्निगृह्यंते ॥ तद्दृष्टांतेन मनोपि हठेन नि
ग्रहीष्यामीति मूढस्य भ्रांतिर्भवति न च तथा निग्रहीतुं शक्यते तद्गोलकस्य हृदयकमलस्यापि रोद्धुमश
क्यत्वात् ॥ अतः क्रमनिग्रह एव युक्तः तदेतद्भगवान्वसिष्ठ आह ॥ उपविश्योपविश्यैव चित्तज्ञेन मुहुर्मु
हुः ॥ न शक्यते मनो जेतुं विना युक्तिमनिंदिताम् ॥ अंकुशेन विना मत्तो यथा दुष्टमतंगजः ॥ अध्यात्म
विद्याधिगमः साधुसंगम एव च ॥ वासनासंपरित्यागः प्राणस्पंदनिरोधनम् ॥ एतास्ता युक्तयः पुष्टाः
संति चित्तजये किल ॥ सतीषु युक्तिष्वेतासु हठान्नियमयंति ये ॥ चेतस्ते दीपमुत्सृज्य ॥ ॥ ॥ राम ॥

गी॰टी॰
म॰ष॰
३॰

विनिहन्तीति तेषां जये निरतिक्रमनिग्रहे चाध्यात्मविद्याधिगम एक उपायः स हि दृश्यस्य मिथ्यात्वं दृग्वस्तुनस्तु प
रमानंदरूपस्वप्रकाशत्वं बोधयति॥ तथा च सति तन्मनः स्वगोचरेषु दृश्येषु मिथ्यात्वेन प्रयोजनाभावं प्रयो
जनवति च परमार्थसत्यपरमानंदरूपे दृग्वस्तुनि स्वप्रकाशत्वेन स्वागोचरत्वं बुद्ध्वा निरिंधनाग्निवत्स्व
यमेवोपशाम्यति यस्तु बोधितमपि तत्त्वं न सम्यग्बुध्यते यो वा विस्मरति तयोः साधुसंगम एवोपायः साध
वो हि पुनः पुनर्बोधयंति स्मारयंति च यस्तु विद्यामदादिदुर्वासनया पीड्यमानो न साधूननुवर्तितुमुत्सहते तस्य पू
र्वोक्तविवेकेन वासनापरित्याग एवोपायः॥ यस्तु वासनानामतिप्राबल्यान्न तास्त्यक्तुं न शक्नोति तस्य प्राणस्पं
दनिरोध एवोपायः प्राणस्पंदवासनयोश्चित्तप्रेरकत्वात्तयोर्निरोधे चित्तशांतिरुपपद्यते॥ तदेतदाह व वसिष्ठः ८
व॥ द्वे बीजे चित्तवृक्षस्य प्राणस्पंदनवासने॥ एकस्मिंश्च तयोः क्षीणे क्षिप्रं द्वे अपि नश्यतः॥ प्राणा
यामदृढाभ्यासैर्युक्त्या च गुरुदत्तया॥ आसनाशनयोगेन प्राणस्पंदो निरुध्यते॥ असंगव्यवहारित्वाद्भ
वभावनवर्जनात्॥ शरीरनाशदर्शित्वाद्वासना न प्रवर्तते॥ वासनासंपरित्यागाच्चित्तं गच्छत्यचित्तताम्॥
प्राणस्पंदनिरोधाच्च यथेच्छसि तथा कुरु। एतावन्मात्रकं मन्ये रूपं चित्तस्य राघव॥ यद्भावनं वस्तुनो
त्ववस्तुत्वेन रसेन च॥ यदा न भाव्यते किंचिद्धेयोपादेयरूपि यत्॥ स्थीयते सकलं त्यक्त्वा तदा चित्तं न
जायते॥ अवासनत्वात्सततं यदा न मनुते मनः॥ अमनस्ता तदोदेति परमात्मपदप्रदेति। अत्र द्वावेवो श्लोके
पायौ पर्यवसितौ प्राणस्पंदनिरोधार्थमभ्यासः वासनापरित्यागार्थं च वैराग्यमिति॥ साधुसंगमाध्या
त्मविद्याधिगमौ त्वभ्यास।

के

३०

वैराग्योपपादकतया। तयोरिति द्वितयोरेवांतर्भावतः ॥ अतएव भगवताभ्यासेन वैराग्येण चेति द्वयमेवोक्तं ॥ अ
तएव भगवान् पतंजलिः सूत्रयत् ॥ अभ्यासवैराग्याभ्यां तन्निरोध इति ॥ तासां प्रागुक्तानां प्रमाणविपर्ययवि
कल्पनिद्रास्मृतिरूपेण पंचविधानामनंतानां क्लिष्टत्वेनाक्लिष्टानां दैवत्वेनाक्लिष्टानामपि वृत्तीनां सर्वासामपि
निरोधो निरिंधनाग्निवदुपशमाख्यः परिणामोभ्यासेन वैराग्येण च समुच्चितेन भवति ॥ तदुक्तं योगभाष्ये ॥ चि
त्तनदी नामोभयतोवाहिनी वहति कल्याणाय वहति पापाय च ॥ तत्र या कैवल्यप्राग्भारा विवेकनिम्ना।
सा कल्याणवहा ॥ या त्वविवेकनिम्ना संसारप्राग्भारा सा पापवहा ॥ तत्र वैराग्येण विषयस्रोतः खि
लीक्रियते ॥ विवेकदर्शनाभ्यासेन च कल्याणस्रोत उद्घाट्यते ॥ इत्युभयाधीनश्चित्तवृत्तिनिरोध इति प्रा
ग्भार निम्नपदे तदा विवेकनिम्ने कैवल्यप्राग्भारं चित्तमित्यत्र वा व्याख्याति ॥ यथा तीव्रवेगोपेतं नदीप्रवाहं
सेतुबंधनेन निवार्य कुल्याप्रणयनेन नद्येवाभिमतं क्षेत्रं तिर्यक्प्रवाहांतरमनुत्पाद्यते ॥ तथा वैराग्येण चि
त्तनद्या विषयप्रवाहं निवार्य समाध्यभ्यासेन प्रशांतवाहितां संपाद्यत इति द्वारभेदात्समुच्चयएव ॥ प
क्षांतरत्वे हि व्रीहियववद्विकल्पः स्यादिति ॥ मंत्रजपदेवताध्यानादीनां क्रियारूपाणामावृत्तिलक्षणो
भ्यासः संभवति सर्वव्यापारोपरमस्य तु समाधेः कोनामाभ्यास इति शंकां निवारयितुमभ्यासं लक्ष
यति सूत्र ॥ तत्र स्थितौ यत्नोभ्यास इति ॥ तत्र स्वरूपावस्थिते द्रष्टरि शुद्धे चिदात्मनि चित्तस्यावृत्तिक।
स्य प्रशांतवाहितारूपा निश्चलता स्थितिः ॥ तदर्थं यत्नो मानस उत्साहः स्वभावचांचल्याद्बहिः।
प्रवाहशीले चित्ते सर्वथा निरोत्स्यामीत्येवं ॥॥॥॥ शिवायनमोनमः ॥॥॥ श्रीरामजीसहा ॥॥

निवा... ...यते

प्रवाहः

ये

वैराग्याभ्यासयोः=

विधः ॥ तस्यावर्त्यमानोभ्यासउच्यते ॥ सतुदीर्घकालनैरंतर्यसत्कारासेवितोदृढभूमिः ॥ अतिनैर्वेदेनदीर्घका
लासेवितोविच्छेदाभावेननैरंतर्यासेवितः सत्कारेणाश्रद्धातिशयेनचासेवितः सोभ्यासोदृढभूमिः ॥ विष
यसुखवासनयाचालयितुमशक्योभवति ॥ अदीर्घकालत्वेदीर्घकालत्वेपिविच्छिद्यविच्छिद्यसेवनेश्र
द्धातिशयाभावेचलयविक्षेपकषायसुखास्वादानामपरिहारेव्युत्थानसंस्कारप्राबल्याददृढभूमि
रभ्यासः फलायनस्यादितित्रयमप्युपात्तम् ॥ वैराग्यंतुद्विविधं ॥ अपरंपरंच ॥ यतमानसंज्ञाव्यतिरेक

श्रीभगवानुवाच ॥ असंशयंमहाबाहो ॥ मनोदुर्निग्रहंचलं ॥ ॥

चतुर्विधवैराग्यमध्ये=८

संज्ञायेकेंद्रियसंज्ञावशीकारसंज्ञाभेदेनापरंचतुर्धा ॥ तत्रपूर्वभूमिजयेनोत्तरभूमिसंपादनविवक्षयाचतु
र्थमेवात्रत्रयत् ॥ दृष्टानुश्रविकविषयवितृष्णस्यवशीकारसंज्ञावैराग्यमिति ॥ स्त्रियोन्नंपानमैश्व
र्यमित्यादयोदृष्टाविषयाः ॥ स्वर्गोविदेहताप्रकृतिलयइत्यादयोवैदिकत्वेनानुश्रविकाविषयाः
तेषूभयविधेष्वपिसत्यामेवतृष्णायांविवेकतारत ॥ ॥ ॥ ॥ ॥ ॥ राम ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ३१

मेनयतमानादित्रयमेवभवति॥ अत्रजगतिकिंसारंकिमसारमितिगुरुशास्त्राभ्यांज्ञास्यामीत्युद्यो
गोयतमानम्। स्वचित्तेपूर्वंविद्यमानदोषाणांमध्येऽभ्यस्यमानविवेकेनएतेपक्वाएतेवशिष्टाइतिवि
कित्सकवद्विवेचनंव्यतिरेकः॥ दृष्टानुश्राविकविषयप्रवृत्तेर्दुःखात्मत्वबोधेनवहिरिंद्रियप्रवृ
त्तिमजनयित्वाऽपितृष्णायाऔत्सुक्यमात्रेणमनस्यवस्थानमेकेंद्रियम्। मनस्यपितृष्णायास्तनु
त्वेनसर्वथावितृष्णस्य॥ तस्याविरोधिनीचित्तवृत्तिर्ज्ञानप्रसादरूपावशीकारसंज्ञावैराग्यंसंप्रज्ञा

अभ्यासेनतुकौंतेय। वैराग्येणचगृह्यते॥२५॥

तस्यसमाधेरंतरंगंसाधनम्। असंप्रज्ञातस्यतुवहिरंगम्। तस्यतुअंतरंगसाधनंपरमेववैराग्यम्॥ तच्चा
स्त्रत्रयत्॥ तत्परंपुरुषख्यातेर्गुणवैतृष्ण्यमिति॥ संप्रज्ञातसमाधिपाटवेनगुणत्रयात्मकात्प्रधा
नाद्विविक्तस्यपुरुषस्यख्यातिःसाक्षात्कारउत्पद्यते॥ ततश्चाशेषगुणत्रयव्यवहारेषुवैतृष्ण्य लि
म्भवतितत्परंश्रेष्ठंफलभूतंवैराग्यंतत्परिपाकनिमित्तंचित्तोपशमपरिपाकादविलंवेनकैवल्यमि २८

परवैराग्यपरिपाकंनिमित्तंकारणंयस्यचित्तोपशमपरिपाकस्यतस्मात्

असंयतात्मना योगो दुष्प्राप इति मे मतिः ॥ वश्यात्मना तु यतता शक्योवाप्तुमुपायतः ॥ ३६ ॥

यत्त्वमवोचः प्रारब्धभोगेन कर्मणा तत्त्वज्ञानादपि प्रबलेन स्वफलदानाय मनसो वृत्तिषूत्थाप्यमानासु कथं ता-
सां निरोधः कर्तुं शक्यः इति तत्रोच्यते ॥ उत्पन्नेऽपि तत्त्वसाक्षात्कारे वेदान्तव्याख्यानादिव्यासंगादालस्यादि-
दोषाद्वाभ्यासवैराग्याभ्यामसंयतो निरुद्धो आत्मान्तःकरणं येन तेनासंयतात्मना तत्त्वसाक्षात्कारवतापि यो-
गो मनोवृत्तिनिरोधो दुष्प्रापः दुःखेनापि प्राप्तुं न शक्यत इति ॥ प्रारब्धकर्मकृताच्चित्तचाञ्चल्यादिति चेत् त्व-
वदसि ॥ तत्र मे मतिः ॥ मम संमतिस्तत्रैवेत्यर्थः ॥ तर्हि केन प्राप्यते ॥ उच्यते ॥ वश्यात्मना तु वैराग्य-
परिपाकेन वासनाक्षयेण सति वश्यः स्वाधीनो विषयपारतन्त्र्यशून्य आत्मान्तःकरणं यस्य तेन तु शास्त्रोक्तसं-
यतात्मनो वैलक्षण्यद्योतनार्थः अवधारणार्थो वा ॥ एतादृशेनापि यतता यतमानेन वैराग्येण विषयस्रो-
तःखिलीकरणेऽप्यात्मस्रोतउद्घाटनार्थमभ्यासं प्रागुक्तं कुर्वता योगः सर्ववृत्तिनिरोधः शक्योऽवाप्तुं वि-
नचांचल्यनिमित्तानि प्रारब्धकर्माण्यभिभूय प्राप्तुं शक्यः कथमतिबलवतामारब्धभोगानां कर्मणा-
मभिभवः उच्यते ॥ उपायतः उपायात् ॥ उपायः पुरुषकारः तस्य लौकिकस्य वैदिकस्य वा प्रारब्ध-
कर्मापेक्षया बलवत्त्वात् ॥ अन्यथा लौकिकानां कृष्यादिप्रयत्नस्य वैदिकानां ज्योतिष्टोमादिप्रय-
त्नस्य च वैयर्थ्यापत्तेः सर्वत्र प्रारब्धकर्मसदसत्त्वविकल्पग्रासात् प्रारब्धकर्मसत्त्वे तत एव फलप्राप्तेः
किं प्रयत्नेन पौरुषेण तदसत्त्वे तु सर्वथापि फलासंभवात् किं तेनेति ॥ अथ कर्मणः स्वयमदृष्टरूपस्य
दृष्टसाधनसंपत्तिव्यतिरेकेण फलजननासमर्थत्वादपेक्षितः कृष्यादौ पुरुषप्रयत्न इति चेत् ॥ यो-
गाभ्यासेपि समं समाधानम् ॥ ॥ ॐ नमः शिवाय ॥ ॥ श्रीराम ॥ ॥ श्रीकृष्ण ॥ ॥ शुभमस्तु ॥ ॥ ॥ ॥

नेतत्साध्यायाजीवन्मुक्तेरपि सत्त्वातिशायद्यत्नेन प्रारब्धकर्मफलान्तर्भावात् ॥ अथवा यथा प्रारब्धफलं कर्म
तत्त्वज्ञानात्प्रबलमिति कल्प्यते दृष्टत्वात् ॥ तथा तस्मादपि कर्मणो योगाभ्यासः प्रबलोस्तु ॥ शास्त्रीयस्य
प्रयत्नस्य सर्वतः प्राबल्यदर्शनात् ॥ तथा चाह भगवान्वसिष्ठः ॥ सर्वमेवेह हि सदा संसारे रघुनंदन स
म्यक्प्रयुक्तात्सर्वेण पौरुषात्समवाप्यते ॥ उच्छास्त्रं शास्त्रितं चेति पौरुषं द्विविधं स्मृतम् ॥ तत्रोच्छास्त्रम
नर्थाय परमार्थाय शास्त्रितं ॥ उच्छास्त्रं शास्त्रप्रतिषिद्धं अनर्थाय नरकाय ॥ शास्त्रितं शास्त्रविहितमं
तःकरणशुद्धिद्वारा परमार्थाय च तत्त्वबोधे परमार्थाय मोक्षाय ॥ शुभाशुभाभ्यां मार्गाभ्यां वहंती वा
सनासरित् ॥ पौरुषेण प्रयत्नेन योजनीया शुभे पथि ॥ अशुभेषु समाविष्टं शुभेष्वेवावतारय स्वमनः

असंयतात्मना योगो । दुष्प्राप इति मे मतिः । वश्यात्मना तु यतता । शक्योवाप्तुमुपायतः ॥ २६ ॥

वामर्दन
बलेन ५=८

पुरुषार्थेन बलिनो ब[illegible]ल्यभ्यासवशाद्याति यदा ते वासनोदयम् ॥ तदाभ्यासस्य साफल्यं विद्धि त्वम
रिमर्दन । वासनाशुभेतिशेषः । संदिग्धायामपि भृशं शुभामेव समाहर ॥ शुभायां वासनावृद्धौ तात दो
षो न कश्चन । अव्युत्पन्नमना यावद्भवानज्ञाततत्पदः ॥ गुरुशास्त्रप्रमाणैस्तु निर्णीतं तावदाचर । ततः
पक्वकषायेण नूनं विज्ञातवस्तुना ॥ शुभोप्यसौ त्वया त्याज्यो वासनौघो निरोधिनेति ॥ तस्मात्सादिग
तस्य संसारस्याविवेकनिबंधनस्य विवेकसाक्षात्कारादपनयेपि प्रारब्धकर्मपर्यवस्थापितस्य चित्तस्य
स्वाभाविकीनामपि वृत्तीनां योगाभ्यासप्रयत्नेनापनये सति जीवन्मुक्तः परमो योगी ॥ चित्तवृत्तिनिरो
धाभावे तु तत्त्वज्ञानवानप्यपरमो योगीति सिद्धम् ॥ अवशिष्टं जीवन्मुक्तिविवेके सविस्तरमनुसंधेयं ३६

गी॰टी॰ अ॰६ ३२

एवं प्राक्तनेन ग्रंथेनोत्पन्नतत्त्वज्ञानोत्पन्नजीवन्मुक्तिः परमो योगी मतः। उत्पन्नतत्त्वज्ञान उत्पन्नजीवन्मुक्ति
स्तु परमो योगी मतः इत्युक्तम् तयोरुभयोरपि ज्ञानादज्ञाननाशेपि यावत्प्रारब्धभोगं कर्म देहेंद्रियसंघा।
तावस्थानात्प्रारब्धभोगकर्मोपायेच वर्तमानदेहेंद्रियसंघातापायात्॥ पुनरुत्पादकाभावाद्विदेह
कैवल्यंप्रति कापि नास्त्याशंका॥ यस्य प्राक्कृतकर्मभिर्लब्धविविदिषापर्यंतचित्तशुद्धिः कृतकार्य
त्वात्॥ सर्वाणि कर्माणि परित्यज्य प्राप्तपरमहंसपरिव्राजकभावः परमहंसपरिव्राजकमात्मसा
क्षात्कारेण जीवन्मुक्तं परप्रबोधनदक्षं गुरुमुपसन्नस्ततो वेदांतमहावाक्योपदेशं प्राप्य तत्रासंभाव

अर्जुन उवाच॥ अयतिः श्रद्धयोपेतो योगाच्चलितमानसः॥३७॥

नाविपरीतभावनाख्यप्रतिबंधनिरासाय॥ अथातो ब्रह्मजिज्ञासेत्याद्यनावृत्तिः शब्दादित्यंतया चत
र्लक्षण्या मीमांसया श्रवणमनननिदिध्यासनानि गुरुप्रसादात्कर्तुमारभते स श्रद्धयान्वितोपि सन्नायु
षोऽल्पत्वेनाल्पप्रयत्नत्वादलब्धज्ञानपरिपाकः श्रवणमनननिदिध्यासनेषु क्रियमाणेष्वेव मध्ये
व्यापद्यते॥ स ज्ञानपरिपाकस्यानुत्पत्तेन अनष्टाज्ञानो न मुच्यते॥ नाप्युपासनासहितकर्मफलं देव।
लोकमनुभवत्यर्चिरादिमार्गेण॥ नापि केवलकर्मफलं पितृलोकमनुभवति धूमादिमार्गेण
कर्मणामुपासनानां च त्यक्तत्वात् अत एवैतादृशो योगी॥॥॥ श्रीराम॥॥ कृष्ण॥॥ गोविंद॥॥॥॥ ३२

भ्रष्टः कीटादिभावेन कष्टां गतिमियादित्यत्वे सति देवयानपितृयानमार्गाभ्यां वंचित्वा हुणी असमाचारभ्रष्ट
त्वे अथवा कष्टां गतिं नेयात् शास्त्रनिंदितकर्माननुष्ठितत्वात् वामदेववदिति संशयपर्याकुलमनाः । अर्जुन
उवाच ॥ यतिर्यत्नशीलः अल्पार्थे नञ् ॥ अलवणा यवागूरितिवत् ॥ अयतिरल्पयत्नः श्रद्धया गुरु
वेदांतवाक्येषु विश्वासबुद्धिरूपयोपेतः युक्तः ॥ अश्रद्धा च स्वसहचरितानां शमादीनामुपलक्षणाय
शांतो दांत उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वाऽत्मन्येवात्मानं पश्यतीति श्रुतेः तेन नित्यानित्यवस्तु-
विवेक इहामुत्रभोगविरागः शमदमोपरतितितिक्षाश्रद्धादिसंपत् मुमुक्षुता चेति साधनचतु

॥ अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥ ३७ ॥

ष्टयसंपन्नः गुरुमुपसृत्य वेदांतवाक्यश्रवणादि कुर्वन्नपि परमायुषोऽल्पत्वेन मरणकाले चेंद्रिया
णां व्याकुलत्वेन साधनानुष्ठानासंभवात् योगाच्चलितमानसः योगाच्छ्रवणादिपरिपाकलब्धज्ञानम
नः तस्माद्ध्यानाकाराच्चलितं तत्फलमप्राप्नुमानसं यस्य सः योगानिष्पत्ते वा अप्राप्य योगसंसिद्धिं तत्त्व
ज्ञानेन भिन्नामज्ञानतत्कार्यनिवृत्तिं पुनरावृत्तिरहितामप्राप्यात्रैव मृतः सन् कां गतिं कृ न
ष्ण गच्छति सुगतिं दुर्गतिं वा कर्मणां परित्यागात् ज्ञानस्य चानुत्पन्नः शास्त्रोक्तमोक्षसाधनानु-
ष्ठायित्वात् शास्त्रगर्हितकर्माननुष्ठितत्वाच्च ॥ ३७ ॥ श्रीरामजी सहा ॥ शुभमस्तु ॥ ॥ ॥ ॥ ॥ ॥ ॥

गी॰टी॰
अ॰६
३५

एतदेव संशयबीजं विवृणोति ॥ कच्चिदिति साभिलाषप्रश्ने ॥ हे महाबाहो महांतः सर्वेषां भक्तानां
सर्वोपद्रवनिवारणसमर्थाः पुरुषार्थचतुष्टयदानसमर्था वा चत्वारो बाहवो यस्येति प्रश्ननिमि
त्तक्रोधाभावस्तत्तु त्वद्दानस्पृहित्वं च सूचितम् ब्रह्मणः पथि ब्रह्मप्राप्तिमार्गे ज्ञाने विमूढः विचि
त्रः अनुत्पन्नब्रह्मात्मैक्यसाक्षात्कार इति यावत् ॥ अप्रतिष्ठः ॥ देवयानपितृयानमार्गगमनहे
तुभ्यामुपासनाकर्मभ्यां प्रतिष्ठाभ्यां साधनाभ्यां रहितः ॥ सोपासनानां सर्वेषां कर्मणां परित्या-
गात् ॥ एतादृश उभयविभ्रष्टः कर्ममार्गाज्ज्ञानमार्गाच्च विभ्रष्टः छिन्नाभ्रमिव वायुना छिन्नं विश

34

कच्चिन्नोभयविभ्रष्टः छिन्नाभ्रमिव नश्यति ॥

कलितं पूर्वस्मान्मेघाद्भ्रष्टमुत्तरमेघं चाप्राप्तमभ्रं यथा दृष्ट्या योग्यं सदंतराल एव नश्यति ॥ त
था योगभ्रष्टोऽपि पूर्वस्मात्कर्ममार्गाच्छिन्नमुत्तरं च ज्ञानमार्गमप्राप्तोंतराल एव नश्यति ॥ क
र्मफलं ज्ञानफलं च लब्धुमयोग्यो न किमिति प्रश्नार्थः ॥ एतेन ज्ञानकर्मसमुच्चयो निराकृतः ॥
एतस्मिन्हि पक्षे ज्ञानफलालाभेऽपि कर्मफललाभसंभवेनोभयविभ्रष्टत्वासंभवात् । न च तस्य कर्म

३५

संभवेपिफलकामनात्यागात्तत्फलभ्रंशवचनमेवकल्पतइतिवाच्यं ॥ निष्कामानामपिकर्मणांफल
सद्भावस्यापस्तंबवचनाद्युदाहरणेनबहुशःप्रतिपादितत्वात् ॥ तस्मात्सर्वकर्मत्यागिनंप्रत्येवायंप्रश्नः
सर्वकर्मत्यागि नेऽजव = ३ अनर्थप्राप्तिशंकायास्तत्रैवसंभवात् ॥३८॥ यथोपदर्शितसंशयापाकरणाययभगवंतमंतर्यामिणा
मर्थयतेपार्थः ॥ एतत्पूर्वोपदर्शितंमेममसंशयंहेकृष्णछेत्तुमपनेतुमर्हस्यशेषतः ॥ संशया
नुत्पादयमीदिग्छेदेनमदन्यःकश्चिदृषिर्वादेवोवात्वदीयमिमंसंशयंछेत्तास्तीत्याशंक्याहत्वद।

अप्रतिष्ठोमहाबाहो ॥ विमूढोब्रह्मणःपथि ॥३८॥ एतन्मेसंशयं
कृष्ण ॥ छेत्तुमर्हस्यशेषतः ॥ त्वदन्यःसंशयस्यास्य ॥ छेत्तानह्युप
पद्यते ॥३९॥

न्यः ॥ त्वत्परमेश्वरात्सर्वज्ञाच्छास्त्रकृतःपरमगुरोःकारुणिकादन्यःअनीश्वरत्वेनासर्वज्ञःकश्चिदृषिर्वा
देवोवाअस्ययोगभ्रष्टपरलोकगतिविषयस्यसंशयस्यछेत्तासम्यगुत्तरदानेननाशयितानहियस्मा।
त्नोपपद्यतेनसंभवति ॥ तस्मात्त्वमेवप्रत्यक्षदर्शीसर्वस्यपरमगुरुःसंशयमेतंमच्छेत्तुमर्हसीत्यर्थः॥३९॥

गी·टी·
म·ष
३५

75

एवमर्जुनस्य योगिनं प्रतिनाशाशंकां परिहरन्नुत्तरम् ॥ उभयविभ्रष्टो योगी नश्यतीति कोऽर्थः किमिह
लोके शिष्टगर्हणीयो भवति वेदविहितकर्मत्यागात् ॥ यथा कश्चिद् दुष्कृत् खलः किं वा परत्र निकृष्टां ग
तिं प्राप्नोति ॥ यथोक्तं स्मृत्या ॥ अथैतयोः पथोर्न कतरेण च न ते कीटाः पतंगा यदिदं दन्दशूकमिति ॥ त
था चोक्तं मनुना ॥ वान्ताश्युल्कामुखः प्रेतो विप्रो धर्मात्स्वकाच्च्युत इत्यादि ॥ तदुभयमपि नेत्याह
हे पार्थ नैवेह नामुत्र विनाशस्तस्य यथाशास्त्रं कृतसर्वकर्मसंन्यासस्य सर्वतो विरक्तस्य गुरुमु-
पसृत्य वेदान्तश्रवणादि कुर्वतो मरणे सति तस्य योगभ्रष्टस्य विद्यते ॥ उभयत्रापि तस्य विनाशो नास्ती-
त्यत्र हेतुमाह ॥ हि यस्मात् ॥ कल्याणकृत् शास्त्रविहितकारी कश्चिदपि दुर्गतिं निन्दाकीर्तिं पर

श्रीभगवानुवाच ॥ पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ॥ ।

त्र च कीटादिरूपतां न गच्छति ॥ अथ येन सर्वं त्यक्त्वा एवं सन् दुर्गतिं न गच्छतीति किमेवं वक्तव्यमित्यर्थः ॥ त
नोत्यात्मानं पुत्ररूपेणेति ततः पिता उच्यते ॥ स्वार्थिके णि तत एव तातः ॥ राक्षसवायसादिवत् ॥ पि
तैव च पुत्ररूपेण भवतीति पुत्रस्थानीयस्य शिष्यस्य तातेति संबोधनं कृपातिशयसूचनार्थं यदुक्तं
योगभ्रष्टः कष्टां गतिं गच्छतीति ॥ अज्ञत्वे सति देवयानपितृयानमार्गोत्पन्नत्वासंभवित्वात् स्वध-
र्मभ्रष्टवदिति तदयुक्तम् ॥ एतस्य देवयानमार्गसंभवित्वेन हेतोरसिद्धत्वात् ॥ पंचाग्निवि-
द्यायां ॥ य इत्थं विदुर्ये चामी अरण्ये श्रद्धां सत्यमुपासते ॥ ॥ श्रीराम ॥ ॥ कृष्ण ॥ ॥ ॐ हरः ॥ ॐ ॥

अग्रार प्रज्ञाये सति=२

तैरर्चिर्भिरभिसंभवंतीत्यविशेषेणपंचाग्निविदामिवाततक्रतूनांश्रद्धासत्यवतामन्यदृत्तिणामपिदेवयानमा
र्गेणाब्रह्मलोकप्राप्तिकथनात् ॥ श्रवणादिपरायणस्यचयोगभ्रष्टस्यश्रद्धावित्तोभूत्वेत्यनेनश्रद्धा
याःप्राप्तत्वात् ॥ शांतोदांतइत्यनेनचानृतभाषणरूपवाग्व्यापारनिरोधरूपस्यसत्यस्यलब्धत्वात् व
हिरिंद्रियाणामनुकूलव्यापारनिरोधोहिदमः ॥ योगशास्त्रेचअहिंसासत्यास्तेयब्रह्मचर्यापरिग्र
हायमाइतियोगांगत्वेनोक्तत्वात् ॥ यदितुसत्यशब्देनब्रह्मैवोच्यतेतदापिनक्षतिःवेदांतश्रवणादे
रपिसत्यब्रह्मचिंतनरूपत्वात् । अततक्रतुत्वेपिपंचाग्निविदामिवब्रह्मलोकप्राप्तिसंभवात् । तथा
चस्मृतिःसन्यासाद्ब्रह्मणःस्थानमितितथाप्रात्यहिकवेदांतवाक्यविचारस्यापिक्रतुशतीतिफलत्व ।

॥ नहिकल्याणकृत्कश्चिद्दुर्गतिंतातगच्छति ॥ ५० ॥

ल्पफलत्वंस्मर्यते ॥ एवंचसंन्यासश्रद्धासत्यब्रह्मविचाराणामन्यतमस्यापिब्रह्मलोकप्राप्तिसाधनत्वात्
समुदितानांतेषांतत्साधनत्वेकिंचित्रम् अतएवसर्वस्वक्रतुरूपत्वेयोगिचरितस्यैतैत्तिरीयाआमनंति
तस्यैवंविदुषोयज्ञस्यात्मेत्यादिना ॥ स्मर्यतेच ॥ स्नातंतेनसमस्ततीर्थसलिलेसर्वापिदत्तावनिर्यज्ञा
नांचकृतंसहस्रमखिलादेवाश्चसंपूजिताः ॥ संसाराच्चसमुद्धृताःस्वपितरस्त्रैलोक्यपूज्योप्यसौ
यस्यब्रह्मविचारणेक्षणमपिस्थैर्यंमनःप्राप्नुयात् इति ॥ ५० ॥ ॥ श्रीरामजीसहाय ॥ शुभमस्तु ॥

तदेवं योगभ्रष्टस्य शुभकृत्त्वेन लोकद्वयेऽपि नाशाभावे किं भवतीत्युच्यते ॥ योगमार्गप्रवृत्तः सर्वकर्मसंन्या
सी वेदान्तश्रवणादि कुर्वन्नन्तराले म्रियमाणः कश्चित्पूर्वोपचितभोगवासनाप्रादुर्भावाद्विषयेभ्यः स्पृह
यति ॥ कश्चित्तु वैराग्यभावनादार्ढ्यान्न स्पृहयति तयोः प्रथमः प्राप्य पुण्यकृतामश्वमेधयाजिनां लोकान

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः ॥ शुचीनां श्रीमतां गेहे ॥ योगभ्रष्टोऽभिजा
यते । ४१ ॥

र्चिरादिमार्गेण ब्रह्मलोकान् ॥ एकस्मिन्नपि भोगभूमिभेदापेक्षया बहुवचनं तत्र चोषित्वा वासमनुभू
य शाश्वतीः ब्रह्मपरिमाणेनाक्षयाः समाः संवत्सरान् ॥ तदन्ते शुचीनां शुद्धानां श्रीमतां विभूति
मतां महाराजचक्रवर्तिनां गेहे कुले भोगवासनाशेषसद्भावाद्जातशत्रुजनकादिवद्योगभ्र
ष्टोऽभिजायते ॥ भोगवासनाप्राबल्याद्[illegible] ॥ श्रीराम ॥ ॥ ॥ ॥ ॥ ॥ ॥

ष्ठलोकांतेषु सर्वकर्मसन्न्यासायोग्यो महाराजो भवतीत्यर्थः ।४१॥ द्वितीयं प्रतिपद्यांतरमाह ॥ अथवा वै-
राग्यादिकल्याणगुणोपेतस्तु भोगवासनाविरहात् पुण्यकृतां लोकानप्राप्यैव योगिनामेव दरि-
द्राणां ब्राह्मणानां नतु श्रीमतां राज्ञां कुले भवति धीमतां ब्रह्मविद्यावतामेतेन योगिनामिति न-
कर्मिग्रहणम् । शुचीनां श्रीमतां राज्ञां गृहे योगभ्रष्टजन्म तदपि दुर्लभं अनेकसुकृतसाध्यत्वा-

अथवा योगिनामेव । कुले भवति धीमतां ॥ एतद्धि दुर्लभतरं । लोके जन्म यदीदृशं ।४२॥

न्मोक्षपर्यवसायित्वाच्च यत्तु शुचीनां दरिद्राणां ब्राह्मणानां ब्रह्मविद्यावतां कुले जन्म एतद्धि प्रसि-
न द्धं मुक्तादिवद्दुर्लभादपि दुर्लभं लोके यदीदृशं सर्वप्रमादकारणशून्यं जन्मेति द्वितीयः तस्य
ते भोगवासनाशून्यत्वेन सर्वकर्मसन्न्यासार्हत्वात् ॥४२॥॥ श्रीकृष्णः ॥ ॥ ॥ ॥ रामजी ॥॥

गी॰टी॰ म॰ष॰ ३७ ति

37

एतादृशं जन्म हृयत्सुदुर्लभतरं कस्मात् ॥ यस्मात् ॥ तत्र द्विप्रकारेऽपि जन्मनि पूर्वदेहे भवं पौर्वदेहिकं सर्वक-
र्मसंन्यासगुरूपसदनश्रवणमनननिदिध्यासनानां मध्ये यावत्पर्यन्तमनुष्ठितं तावत्पर्यन्तमेव तं ब्रह्मात्मै-
क्यविषयया बुद्ध्या संयोगं तत्साधनकलापमिति यावल्लभते प्राप्नोति न केवलं लभत एव ॥ किं तु तत-
ल्लाभानन्तरं भूयोऽधिकं लब्धाया भूमेरग्रिमां भूमिं संपादयितुं संसिद्धौ संसिद्धिर्मोक्षस्तन्निमित्तं यतते च प्र-
यत्नं करोति च यावन्मोक्षं भूमिकाः संपादयतीत्यर्थः ॥ हे कुरुनन्दन तत्रापि शुचीनां श्रीमतां कुले योगभ्रष्ट-
जन्म जातमिति पूर्ववासनावशादनायासेनैव ज्ञानलाभो भविष्यतीति सूचयितुं महाप्रभावस्य कुरोः ।
कीर्तनमयमर्थो भगवद्वसिष्ठवचने व्यक्तः ॥ यथा श्रीरामः ॥ एकामथ द्वितीयां भूमिकामतत ॥ आरू- वा तृतीयां

॥ तत्र तं बुद्धिसंयोगं ॥ लभते पौर्वदेहिकम् ॥

ढस्यैतस्याश्च भगवत्कीर्त्तिश्रीगीतिरिति ॥ पूर्वं हि सप्तभूमयो व्याख्याताः ॥ तत्र नित्यानित्यवस्तुविवेकपू-
र्वकादिहामुत्रार्थभोगवैराग्यशमदमश्रद्धातितिक्षासर्वकर्मसंन्यासादिपुरःसरा मुमुक्षा शुभेच्छा-
ख्या प्रथमा भूमिका ॥ साधनचतुष्टयसंपत्तिरिति यावत् ॥ ततो गुरुमुपसृत्य वेदान्तवाक्यविचारणात्मि-
का द्वितीया भूमिका श्रवणमननसंपत्तिरिति यावत् ।२। ततः श्रवणमननपरिपक्वस्य तत्त्वज्ञानस्य निर्वि-
चिकित्सनात्तनुमानसा नाम तृतीया भूमिका निदिध्यासनसंपत्तिरिति यावत् ।३। चतुर्थी भूमिका
ग्तत्त्वसाक्षात्कार एव ४ ॥ पंचमषष्ठसप्तमभूमयस्तु जीवन्मुक्तेरवान्तरभेदा इति तृतीयेऽध्याये प्राग्व्या- ३७

तुर्यां भूमिं प्राप्तस्य तस्य जीवन्मुक्त्यभावे पि विदेहकैवल्यं प्रति नास्त्येव संशयः ॥ तद्वत्तृभूमित्रयं प्राप्तस्य
जीवन्नपि मुक्तः किंतु विदेह इति नास्त्येव भूमिकाचतुष्टयेशंकासायन भूतभूमिकात्रये तु कर्मत्यागा
त्तज्ज्ञानालाभात्कुभवति शंकेति तत्रैव प्रश्नः ॥ श्रीवसिष्ठः ॥ योगभूमिकयोत्क्रान्तजीवितस्य शरीरि
णः भूमिकांशानुसारेणाद्दीयते पूर्वदुष्कृतम् ॥ ततः सुरविमानेषु लोकपालपुरेषु च ॥ मेरूपव
नकुंजेषु रमते रमणीसखः ॥ ततः सुकृतसंभारे दुष्कृते च पुराकृते ॥ भोगक्षयात्परिक्षीणो जायंते
योगिनो भुवि ॥ शुचीनां श्रीमतां गेहे गुप्ते गुणवतां सताम् ॥ जनित्वा योगमेवैते सेवंते योगवासिताः

यतते च ततो भूयः ॥ संसिद्धौ कुरुनंदन ॥ ५३ ॥

तत्र प्रागभ्यावनाभ्यस्तयोगभूमिकं तु यथा । इत्यपि पठितं तत्रैव तत्तद्भूमिकाक्रमम् इति ॥ अत्र प्रागुपचितभोगवा
सनाप्राबल्यादल्पकालाभ्यस्ते वैराग्यवासनादौर्बल्येन प्राणोत्क्रान्तिसमये प्रादुर्भूतभोगस्पृहः सर्वकर्म
संन्यासी यः स एवोक्तः यस्तु वैराग्यवासनाप्राबल्यादुत्कृष्टपुण्यप्रकटितपरमेश्वरप्रसादवशेन प्राणो
त्क्रान्तिसमयेऽप्यनुद्भूतभोगस्पृहः संन्यासी भोगव्यवधानं विनैव ब्राह्मणानामेव ब्रह्मविदां सर्वप्रमादका
रणशून्ये पुकुले समुत्पन्नस्य प्राक्तनसंस्काराभिव्यक्तेरनायासेनैव संभवान्नास्ति पूर्वस्येव मोक्षं प्रत्याशं
केति स वसिष्ठेनोक्तः भगवता तु परमकारुणिकेनाथवेति पदान्तरं कृत्वोक्त एव । स्पष्टमन्यत् ॥ ५३ ॥

ननु योब्रह्मविदां ब्राह्मणानां सर्वप्रमादकारणशून्ये कुले समुत्पन्नस्तस्य मध्ये विषयभोगव्यवधानाभा
गी॰टी॰ वादव्यवहितप्राग्भवीयसंस्कारोद्बोधात्पुनरपि सर्वकर्मसंन्यासपूर्वकज्ञानसाधनलाभो भवतु नाम
म॰ष॰ यस्तु श्रीमतां महाराजचक्रवर्तिनां कुले बहुविधविषयभोगव्यवधाने तोत्पन्नस्तस्य विषयभोगवा
३८ सनाप्राबल्यात्प्रमादकारणसंभवाच्च कथमतिव्यवहितज्ञानसंस्कारोद्बोधः द्वन्नियतेन सर्वक
र्मसंन्यासानर्हस्य कथं वा ज्ञानसाधनलाभ इति तत्रोच्यते ॥ अतिचिरव्यवहितजन्मोपचितेनापि

38

पूर्वाभ्यासेन तेनैव ॥ ह्रियते ह्यवशोऽपि सः ॥

तेनैव पूर्वाभ्यासेन प्रागर्जितज्ञानसंस्कारेण अवशोऽपि मोक्षसाधनायाप्रयतमानोऽपि ह्रियते स्ववशी
क्रियते । अकस्मादेव भोगवासनाभ्यो व्युत्थाप्य मोक्षसाधनोन्मुखः क्रियते ॥ ज्ञानवासनायाः प्र
बाल्यकालाभ्यस्ताया अपि वस्तुविषयत्वेनावस्तुविषयाभ्यो भोगवासनाभ्यः प्राबल्यान्नृपपुष्प यथा
त्वमेव युद्धे प्रवृत्तो ज्ञानायाप्रयतमानोऽपि पूर्वसंस्कारप्राबल्यादकस्मादेव रणभूमौ ज्ञानोन्मु
खोऽभूदिति ॥ अत एव प्रागुक्तं नेहाभिक्रमनाशोऽस्तीति ॥ अनेकजन्मसहस्रव्यवहितोऽपि ज्ञाना
संस्कारः स्वकार्यं करोत्येव सर्वविरोध्युपमर्देनेत्यभि ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ३८

चौरेण

प्रायः सर्वकर्मसन्न्यासाभावेपि हि तत्रियस्य ज्ञानाधिकारः स्थित एव ॥ यथा पाटच्चरेण बहूनां वह्निणां मध्ये वि
द्यमानस्यापि स्वादिद्रव्यं स्वयमतिक्रुदपि तान् सर्वानभिभूय स्वसामर्थ्यातिशेषादेवापह्रियते ॥ पश्चात्तैः कदापह
तमिति विमर्शो भवति ॥ एवं बहूनां ज्ञानप्रतिबंधकानां मध्ये विद्यमानोपि योगभ्रष्टः स्वयमतिक्रान्तपि ज्ञानसं
स्कारेणावलवतां स्वसामर्थ्यविशेषादेव सर्वान्प्रतिबंधकानभिभूयात्मवशीक्रियत इति हृज्जः प्रयोगेणाह्ना
चितम् ॥ अत एव संस्कारप्राबल्याज्जिज्ञासुर्ज्ञानमिक्षुरपि योगस्य मोक्षसाधनज्ञानस्य विषयं ब्रह्मप्रथ

जिज्ञासुरपि योगस्य । शब्दब्रह्मातिवर्तते ॥ ४४ ॥

मभूमिकायांस्थितः सन्न्यासीति यावत् ॥ सोपि तस्यामेव भूमिकायां मृतोऽनन्तरालेव हि विषयान् भुक्त्वा महा
राजचक्रवर्तिनां कुले समुत्पन्नोपि योगभ्रष्टः प्रागुपचितज्ञानसंस्कारप्राबल्यात् तस्मिन् जन्मनि शब्द
ब्रह्मवेदं कर्मप्रतिपादकमतिवर्तते अतिक्रम्य तिष्ठति ॥ कर्माधिकारातिक्रमेण ज्ञानाधिकारी भवतीत्ये
वेत्यर्थः ॥ एतेनापि ज्ञानकर्मसमुच्चयो निराकृत इति द्रष्टव्यं समुच्चये हि ज्ञानिनोपि कर्मकांडातिक्रमाभा

यदा चैवं प्रथमभूमिकायां मृतो ऽनेकभोगवासनाव्यवहितमपि विविधप्रमादकारणवति महाराजकु
ले ऽपि जन्म लब्ध्वापि योगभ्रष्टः पूर्वोपचितज्ञानसंस्कारप्राबल्येन कर्माधिकारमतिक्रम्य ज्ञानाधिकारी ।
भवति तदा किमु वक्तव्यं द्वितीयायां तृतीयायां वा भूमिकायां मृतो विषयभोगांते लब्ध्वा महाराजकुल ।
जन्म यदि वा भोगमकृत्वैव लब्ध्वा ब्रह्मविद्ब्राह्मणकुलजन्मा योगभ्रष्टः कर्माधिकारातिक्रमेण ज्ञा ।
नाधिकारी भूत्वा तत्साधनानि संपाद्य तत्फललाभेन संसारबंधनान्मुच्यत इति तदेवाह ॥ प्रयत्नात्

प्रयत्नाद्यतमानस्तु ॥ योगी संशुद्धकिल्बिषः ॥ अनेकजन्मसंसिद्ध । स्ततो याति परां गतिं ४५ ॥

र्वकृतादपि अधिकमधिकं यतमानः प्रयत्नातिरेकं कुर्वन् योगी पूर्वोपचितसंस्कारवान् ॥ तेनैव योग
प्रयत्नपुण्येन संशुद्धकिल्बिषः ॥ धौतज्ञानप्रतिबंधकपापमलः ॥ अत एव संस्कारोपचयात्पु ।
ण्योपचयाच्च अनेकैर्जन्मभिः संसिद्धः संस्कारातिरेकेण पुण्यातिरेकेण च प्राप्तचरमजन्मा ।
ततः साधनपरिपाकात् याति परां प्रकृष्टां गतिं मुक्तिं नास्त्येवात्र कश्चित्संशय इत्यर्थः ॥ ४५ ॥ तस्मा

इदानीं योगी स्तूयते अर्जुनं प्रति सुज्ञातिशयोत्पादनपूर्वकं योगं विधातुम् ॥ तपस्विभ्यः कृच्छ्रचान्द्रायणादि
तपःपरायणेभ्योऽपि ॥ अधिकः उत्कृष्टो योगी ॥ तत्त्वज्ञानोत्पत्त्यनन्तरं मनोनाशवासनाक्षयकारी विद्यया तत्
दारोहन्ति यत्र कामाः परागताः ॥ न तत्र दक्षिणा यन्ति नाविद्वांसस्तपस्विन इति श्रुतेः ॥ अत एव कर्मिभ्योऽपि दक्षि
णासहितज्योतिष्टोमादिकर्मानुष्ठायिभ्यश्च अधिको योगी कर्मिणां तपस्विनां चाज्ञत्वेन मोक्षानर्हत्वा
त् ॥ ज्ञानिभ्योऽपि परोक्षज्ञानवद्भ्योऽपि अपरोक्षज्ञानवानधिको मतो योगी ॥ एवमपरोक्षज्ञानवद्भ्योऽपि म

तपस्विभ्योऽधिको योगी ॥ ज्ञानिभ्योऽपि मतोऽधिकः । कर्मिभ्यश्चाधिको योगी ॥ तस्माद्योगी भवा
र्जुन ॥ ४६

नोनाशवासनाक्षयाभावादजीवन्मुक्तेभ्यो मनोनाशवासनाक्षयवत्त्वेन जीवन्मुक्तो योगी अधिको मतः संम
सम्मतः यस्मादेवं तस्मादधिकप्रयत्नबलात्त्वं योगी भव ॥ इदानीं तत्त्वज्ञानमनोनाशवासनाक्षयैर्युगपत्सं
पादितैर्योगी जीवन्मुक्तो यः स योगी परमो मत इति प्रागुक्तः तादृशो भवसाधनपरिपाकात् ॥ हे अर्जु
५ नेति प्रहृष्ट इति संबोधनार्थः ॥ ४६ ॥ इदानीं सर्वयोगिश्रेष्ठं योगिनं वदन् ध्यानमुपसंहरति योगिनामवसुरुद्रा
दित्यादिक्षुद्रदेवताभक्तानां सर्वेषामपि मध्ये मयि भगवति वासुदेवे पुराणपरिपाक ॥ ॥ शुभम् ॥

गी॰टी॰ म॰ष॰ ८०

विशेषाद्भक्तेन प्रीतिवशात्तिविष्ठेत ॥ मद्गतेनांतरात्मनाश्रेतः करणेन प्राग्भवीयसंस्कारपाटवात् साधुसंगाच्च म
द्भजन एव श्रद्धावान् सातिशयेन श्रद्दधानः सन् भजते सेवते ॥ सततं चिंतयति ॥ योमां नारायणमीश्वरेश्व
रं सगुणं निर्गुणं वा मनुष्यादयमीश्वरांतर्यामीत्यादिभिर्महित्वा स एव मद्भक्तो योगी युक्ततमः स
र्वेभ्यः समाहितचित्तेभ्यो युक्तेभ्यः श्रेष्ठो मे मम परमेश्वरस्य सर्वज्ञस्य मतो निश्चितः ॥ समानेपि योगाभ्या
सक्लेशे समानेपि भजनायासे मद्भक्तिशून्येभ्यो मद्भक्तस्यैव श्रेष्ठत्वात् ॥ त्वं मद्भक्तः परमो युक्ततमोऽतो या

योगिनामपि सर्वेषां ॥ मद्गतेनांतरात्मना ॥ श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ४७ ॥

इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे आत्मसंयमयोगो
नाम षष्ठोऽध्यायः ६ ॥ ॥

स्तेनैव भवितव्यं शाद्ध्यसीति भावः ॥ तदनेनाध्यायेन कर्मयोगस्य बुद्धिशुद्धिहेतोर्मर्यादां दर्शयता तत्तत्कृत
सर्वकर्मसंन्यासस्य सांगं योगं विवृण्वता मनोनिग्रहोपायं चाशंकापनिरासपूर्वकमुपदिश्य योगभ्रष्ट ना
स्य पुरुषार्थशून्यताशंकां च शिथिलयता कर्मकांडं त्वंपदार्थनिरूपणं च समापितं श्रेतः परं श्रद्धावा ब
न्भजते यो मामिति सूचितं भक्तियोगं भजनीयं च भगवंतं वासुदेवं तत्पदार्थं निरूपयितुमग्रिमम
ध्यायषट्कमारभत इति शिवम् ४७ समाप्तं चेदं कर्मकांडं त्वंपदार्थप्रतिपादनं परम् इति श्रीम द
त्परमहंसपरिव्राजकाचार्यवर्य श्रीविश्वेश्वरसरस्वतीपादशिष्य श्रीमधुसूदनसरस्वती
विरचितायां भगवद्गीतागूढार्थदीपिकायां त्वंपदार्थनिरूपणं नाम षष्ठोऽध्यायः ६ ॥